वेन संख्यादित्वात्तदवैयर्थ्यं स्पष्टमेव॥ इयं च प्रातिपदिकग्रहणे एव न तु प्रातिपदिकग्रहणे तेनोगितश्चेत्यत्र न दोष इति त

त्रैव भाष्ये स्पष्टं॥ इयं ग्रहणवतेति च परिभाषा प्रत्ययविधिविषयैवेत्यसमासेनिष्कादिभ्य इति सूत्रे भाष्यकैयटयोः॥ तेनाग्नि

त्यादेः परमादन्तशब्दे केवलाद्भन्नशब्दे च प्रवृत्तिरित्यन्यत्र विस्तरः॥ ननु वांतोयीत्यादौ या देशप्रत्ययपरे इत्यर्थः कथमत आह॥

यस्मिन्विधिस्तदादावल्ग्रहणे॥ ३१॥ तदन्तविधेरपवादोऽयं॥ वाचनिकोऽयं येन विधिरित्यत्र भाष्ये पठिता॥ अस्या

श्च स्वरूपसती सप्तमी निमित्तं॥ अत एव नेड्वशीत्यादौ वशादेवकृत इत्यर्थलाभः॥ इयं च आर्धधातुकस्येड्वलादेरित्यत्रैव वल

देरित्यादिग्रहणसामर्थ्याद्विशेष्यविशेषणयोः सप्तम्यन्तत्वे एव प्रवर्तते॥ तेन उः सिधुर् सादौ सादेः पदस्येति नार्थः॥ ती

तत्रापि असमासग्रहणप्रयोजनोऽन्यवसरे अहृदिगोषु च्छो त्यन्नतदन्तविधौ पारमगोपु च्छिकमित्यत्र कप्रतिषेधात्तत्फलमिति स्वउनायविधेः प्रतिषेधः प्रतिषेधश्चायमिमुक्तं॥ तेन

चानयोर्द्वयोस्तद्धिप्यतास्पष्टमेव ध्वनिता॥ अन्यथा तदन्तविदो ऽन्येन केवलेऽसाधनेन च तदसंगतिः स्यादेव॥ एवं च अत एव नोनादिसादिप्राचोक्तिरसंगतैव ८४

१ तत्र वलादेरित्यनुवृत्तेर्न केवलं शयलंरोतकारविशेषणात्तकाराभिन्नवलादेरार्धधातुकस्येडिति रीत्या ॥ एवं संसिची सत्वापि ॥ वस्त्र, नेरस्त्र, तत्रेदशसादेशार्धधातुकस्येडर्थकरणेनकपिस्तिः १

प०भा०शे० यसहसे सिची त्याद्यौ यथान्तादेरिसाद्यर्थलाभस्तथाशब्देंदुशेखरे निरूपितं ॥ घटपटं घटपटौ इत्यादिसिद्धये आह ॥ सर्वो द्वंद्वो विभाषैकवद्भवति २२ ॥ द्वंद्वश्च प्राणीत्यादिप्रकरणाऽविषयस्सर्वो द्वंद्व इत्यर्थः ॥ चार्थे द्वंद्व इति सूत्रेण समाहारेतरेतरयोगयोरविशेषेण द्वं

११ द्वविधानान्न्यायसिद्धेयं ॥ तिष्यपुनर्वस्वोरिति सूत्रस्थं बहुवचनस्येति ग्रहणमस्याः ज्ञापकं ॥ तद्धि द्वंद्व इति तिष्यपुनर्वसुइत्यत्र तद्व्यावृत्त्यर्थं ॥ न चैवमप्यत्र जातिरप्राणिनामिति सेकवद्भावेन बहुवचनाभावादिदं सूत्रं व्यर्थमिति वाच्यं ॥ तेद्धि कालिकत्वस्याप्यनेन ज्ञापनात् ॥ न चैतेनाप्राणिन इति वाच्यं ॥ आपोमयः प्राण इति श्रुतेरद्भिर्विनाम्लायमानप्राणानामेव प्राणित्वात् ॥ स्पष्टं चेदं तिष्यपुनर्वस्वोरि

बहुवचनग्रहणादिव तिसूत्रे भाष्ये ॥ अत एव द्वंद्वश्च प्राणीत्यादौ प्राण्यंगादीनामेव समाहार इति विपरीतनियमोन ॥ सर्वो विधयश्छंदसि विकल्प्यन्ते ॥ ३॥ अन्यतरस्यां बहुलमिति योगविभागेन षष्ठीयुक्तश्छंदसीति सूत्रे वेति योगविभागेन चैषा साधिता ॥ तेन प्रतीपमस्युर्विंयुवतीत्यादि सिद्धं ॥ युधमेतद्दति प्राप्नोति ॥ ननु क्षियइत्यादावियङ्कथमत आह ॥ प्रकृतिवदनुकरणं भवति ॥ २४ ॥ क्षियइती ११

२ वस्त्रेत्यत्रापरीतत्रिपयमानावेव बहुवचनग्रहणं न ज्ञापकं किंतु विभाषावृक्षमृगेति विभाषाग्रहणं ॥ अन्यथा एकवत्प्रकरणेऽरतरेतरयोगस्याप्निषेधेन बहुवचनग्रहणस्य चारिनार्थ्यमिति ध्येयं ॥ द्वंद्वविभाषेति सूत्रे विवरणे ३

क्षियोदीर्घादिति सूत्रैकदेश इति भावः ॥ यद्यपि निर्देशादेव दीर्घग्रहणमत्रान्यथा गुणस्यान्यथापि क्षियो निष्ठायामण्यदर्थ इत्यत्र वा क्षियस्यतात्वैयदृपं तदनुकरणस्वादेव दीर्घग्रहणमित्यत्र क्षियोदीर्घादिति शेखरे तथा चात्र कथमियङिति शंकेति चेत्स्वायसमाधिः शेखरे स्पष्टाशभात्र वर्यंते ॥ भाष्यरीत्या तु दीर्घग्रहणसार्थक्यानन्तरं नतु क्षीइत्यस्य सिद्धयङ्कतेवःतस्य च धातुत्वाभावेन कथमियङ्घाशयेनायं ग्रंथ इति बोध्यं ॥ १॥ नं

यङ्निर्देशस्यात्रापकः ॥ तत्रैव प्रातिपदिकत्वनिबंधनविभक्तिकरणादाने त्याचेयमिति क्षियो दीर्घादिति सूत्रे भाष्ये स्पष्टं ॥ ननु राभावित्यादौ हृदेहोत्कृत्तायां कर्यकालपसेकथं पद्त्वं उभयत आश्रयणेनादिवत्त्वाभावाघस्मादिहितस्तदादितदंतत्वाभावात् तेज्ञा ॥ एकदेशविकृतमनन्यवत् ॥ ३५ ॥ अनन्यवदित्यस्यान्यवन्ने त्यर्थः ॥ तत्रासमासा इत्येतनिषेधश्चान्यत्वाभावः सुतरां ॥ अत एव तादृशाद्दर्थबोधः ॥ अन्यथाशक्तत्वात्वच्छेदकानुपूर्व्या ज्ञानात्ततो बोधोन स्यात् ॥ एवं च राम इतिमांतस्य यस्मादिहितस्तत्त्वं ॥ औ इत्यस्य पराद्विनस्त्वमिति तदंतत्वमर्थसमाजयस्तं ॥ छिन्नपुच्छे श्वविश्वत्ववव्यवहारवत् ॥ सांतेनत्वं लोकन्यायसिद्धं ॥ अत एव प्राग्दीव्यत इति सूत्रे भाष्ये दीव्यतिशब्दैकदेशदीव्यस्यानुकरणमित्युक्त्वा किमर्थं विकृतनिर्देशः ॥ एतदेव ज्ञापयत्याचार्यः भवत्येषापरिभाषा एकदेशविकृतमनन्यवदितीत्युक्तं ॥ एतेनायं न्यायः शास्त्रीयकार्ये एव शास्त्रीयविकार एवेत्यपास्तं ॥ विकृतावयववन्निबंधनकार्ये तु नायं ॥ छिन्नपुच्छे श्वनि पुच्छत्वव्यवहाराभाववत् ॥ विकृतावयववत्त्वव्यवहारस्य दुरुपपादत्वात् ॥

अनन्यपरिभाषया आनुपूर्वीविशेषोपि ॥ परिभाषिकसुपलक्षणं येरिच्छिन्नार्थग्रहणेऽस्त्यर्थः ॥ अत एव दीव्यादिवसिखा या अपि भाष्ये दृष्टा तैर्नो ह्येषः कुर्नयतरस्या भावेऽनत इति तदंततमानेतु शब्दस्तेनदृशाभावेनिफलेनासि ॥ किंतु चिकीर्षतिविवर्तिपति इसादौ द्वित्वे कृते नरुत्वादिः शयइत्यमस्त्यर्थसमद्भाव... द्विरुक्तवतयेववतस्सर्वभाग्यएत्वमानोपते तत्र... मतस्याबोध्यं ७

येन विधिरिति सूत्रभाष्यादावासंज्ञाप्रकरणपरिभाषाणामेकवाक्यतेत्युक्तं तत्स्यात् यावत्प्रवृत्तिरिति प्रसंगसहायसूत्रभाष्य‍ ... न्यायात्प्रवृत्तिरापृश्नोगुडादकनिसंत्रतन्मायसंचारपुराघंतस्त्र
भाष्यान्तयाश्रयेमाविसत्रेण न्यायेन संज्ञाप्रतिपादकार्थः परेति भाष्याख्यातं तत्र ... प्रकरणे ... संज्ञाप्रकरणपरिभाषाणां वाक्यैकवाक्यतेन सूत्रभाष्यादावुक्तं तत्सूत्रस्य भाष्यमेकदेशयु
क्तिः ॥ अंगभाष्य एवतत्त्वंचडनात् ॥ अंगसंज्ञासूत्राच्चः परसूत्रभाष्ययोः परस्परविरोधात्तस्यैकदेशयुक्तित्वमितिविभावनीयं ॥ ७१

प० भा० शे० एवं संज्ञकेपरिभाषाग्रहणेपिनायमुक्तयुक्तेः ॥ एतद्येनाविधिरितिसूत्रभाष्यकैयटयोर्ध्वनितं ॥ यत्रत्वर्थं तदधिकं वाविकृतं तत्रजतिवं
१८ जकभयोः वयवदर्शनाभावेनतत्वाप्रतीतेर्नोकार्यसिध्यर्थंविकृतानात् ॥ रूपावयवत्वप्रतीत्यर्थं चस्यानिवत्सूत्रं ॥ कश्चित्तस्यानुसा
रान्न्यायानाश्रयणं तेनाभीयादित्यादिसिद्धिः ॥ स्पष्टं चकृतेन्न्यायप्रवृत्तिः प्रथमयोः पूर्वसवर्णइत्सत्रकैयटेनदर्शितेत्यन्यत्रवि
स्तरः ॥ पूर्वपरनित्यांतरंगापवादानामुत्तरोत्तरंबलीयः ३६ पूर्वात्परंबलवत् ॥ विप्रतिषेधशास्त्रात् ॥ पूर्वस्यपरंबाधकमितिया
वत् ॥ नचैवंभिंद्यकीत्यत्रपरत्वाद्धिनाबाधितेऽकेचनेस्यादतआह ॥ पुनः प्रसंगविज्ञानात्सिद्धं ३७ ॥ ननेवंतिसृणामित्यत्र
परत्वात्तिस्रादेशेपुनस्त्रयादेशस्स्यादतआह ॥ सकृद्गतौविप्रतिषेधेयद्बाधितंतद्बाधितमेव ३८ तत्रकृचिद्वरितार्थयोरे
कस्मिन्युगपद्प्राप्तयोः कार्ययोरसंभवेनबाधकाभावात्पर्यायेणतज्जादिवद्भयप्रसंगेनियमार्थोविप्रतिषेधसूत्रमि
तिसकृद्गतिन्यायसिद्धिः ॥ यथातुल्यबलयोरेकः प्रेष्योभवतिसतयोः पर्यायेणकार्यंकरोति ॥ यदातमुभौयुगपत्प्रेषयतो १८
भिंधिसत्रपरत्वातत्तानङ्बाधितोधिर्नअपपाद ॥ ४

नानादिक्षुचकार्येतदोभयोर्नकरोति ॥ यौगपद्यासंभवात् ॥ तथाशास्त्रयोरर्थस्यार्थयोर्ब्वचिल्लक्ष्येयौगपद्येनप्रवृत्त्यासंभवादप्र
तिपत्तौप्राप्तायामिदंपरविध्यर्थं ॥ तत्रकृतेयदिपूर्वप्राप्तिरस्तितर्हितदपिभवत्येवेतिपुनः प्रसंगविज्ञानसिद्धिरितिविप्रतिषेधसूत्रे
भाष्येस्पष्टं ॥ यत्तुकैयटादयोयुक्तौपदार्थेप्रतिउत्पलक्षणोपन्नवादुभयोरपिशास्त्रयोस्तमन्तलक्षणविषययोश्चारितार्थ्येनपर्या
येणद्वयोरपिप्राप्तौपरमेवेतिनियमार्थमिदमितिसकृद्गतिन्यायसिद्धिः ॥ अत्रपक्षेएतस्मिन्नियमवशादेतल्लक्षणविषयकपूर्वशास्त्रा
नुपपत्तवएवाजातिपक्षेतुदेशपतावच्छेदकाक्रांतेकचिल्लक्ष्येचरितार्थयोर्द्वयोः शास्त्रयोः सप्रतिपक्षन्यायेनयुगपदुभया
संभवरूपविरोधस्थलेउभयोरप्राप्तौपरविध्यर्थमितिपुनः प्रसंगविज्ञानसिद्धिरितिनभअत्र ॥ व्यक्तिपक्षेसर्वैरलक्ष्यंशा
स्त्रव्याप्नोतिनजातिपक्षेद्वस्त्वमानाभावात् ॥ नन्वालंपाहत्यादित्यादौजात्याश्रयसकलव्यक्तिविषयत्वार्यमेवजातिप
क्षाश्रयणस्यभाष्येदर्शनात् ॥ अतएवसरूपसूत्रेभाष्येजातौपक्षपेऽनवयवेनसाकल्येनाविधेः प्रवृत्तेर्गौरनुबध्यत

प॰भा॰शे॰ इत्यादौ सकलगवामनुबंधनासंभवात्कर्मणो वैगुण्यमुक्तं॥ इयवादे चासर्वद्रव्यगते गौरनुबंध्य इत्यादावेकः शास्त्रेऽभ्युक्तोऽपरोऽशा
१९ स्त्रोक्त इत्युक्तं॥ किंच भाष्योक्ततज्जातिदृष्टांतस्य व्यक्तिपक्ष एव सर्वविषयत्वं न जातिपक्षे इत्यत्र मानमस्ति। अपि च व्यक्तिपक्षेऽप्य
न्यभक्तिरूपविषयलाभेन चरितार्थयोरिवं व्यक्तिविरोधात्स्वविषयकत्वं न कल्पयतीति वक्तुं शक्यं॥ जातिपक्षेऽपि तज्ज्ञातस्याश्र
यतद्व्यक्तिविषयकत्वमेव नैतद्व्यक्तिविषयकत्वमित्यत्र विनिगमकाभावस्तत्तच्छास्त्रानुसारात्क्वचित्तु शास्त्रीयदृष्टांताश्रय
णं क्वचिल्लौकिकदृष्टांताश्रयणमिति भाष्यसंमतमार्ग एव युक्त इति कौ बोध्यं॥ द्वयोः कार्ययोर्यौगपद्येनासंभव एव विप्रतिषे
धशास्त्रप्रयोगः॥ इगमिकोऽगुणा इति सूत्रे कैय्यटे स्पष्टं॥ यथा शिष्टादित्यादौ नातङ् शभावयोर्युगपत्प्रवृत्तौ स्वस्वनिमित्ता
नंतर्यासंभवः। यद्यपि तातङादेः स्थानिवत्त्वेनास्त्येव तत्तेयाप्यादेशप्रवृत्त्युत्तरमेव सन्न तु तत्प्रवृत्तिकाले॥ एवं तु मन्तत्वतोः प्रि
यकोष्टनीत्यादौ युगपदसंभवः यदागमा इत्यस्यानुमप्रवृत्त्युत्तरं प्रवृत्तेः। एवं भिंधीत्यत्र तातङ् धिभावयोर्युगपदेकस्थानिस १९

ननु नियमात्प्राक् तदनंतरं च विकरणस्य प्राप्तत्वात्सानिमित्तत्वमिति परत्वादिसयुक्तमिति चेन्न॥ अमुद्रानदित्त इत्यादेरष्टादशादेशमध्ये आत्मनेपदमेव तिष्ठेत्तत्र मन्निवर्तनेन
सिर्थः॥ तयोश्चात्मनेपदविधायकानां तत्परस्मैपदनिवर्तकत्वे पचतौ निलक्ष्यं तत्र विकरणानंतरनियमाप्राप्त्याशङ्क्तरप्राप्त्या च विकरणस्याप्यनित्यत्वात्॥ न॰ ५

बंधस्यागरूपनिमित्तानंतर्यस्य चासंभवो बोधः। तुम्नुटेररपि नुडि अजादि विनत्वानंतर्यबाधः नुमङ्गस्वांतागबाध इत्यसंभवा
द्विप्रतिषेधः॥ क्वचिद्विप्रतिषेधे तु पूर्वस्य सिद्धवरितत्वप्रतिज्ञावकाशत्वरितेनाधिकं कार्यमित्यर्थात्सर्वमेव भवति तेन न एवं सर्ववि
प्रतिषेधाः संगृहीता इति स्वरितेनेति सूत्रे भाष्ये स्पष्टं॥ विप्रतिषेधसूत्रस्य परशब्दस्येष्टवाचित्वात्तत्संग्रह इति विप्रतिषेध इति
पतस्य स्त्रीति सूत्रेण विकरणवैयर्थ्यापरत्वाति वादिषु आविशेषेण कृतेषु सत्सु इति शेषः। सूत्रे भाष्ये। नन्वेवमेधत्ते पचते पकष्य
तेत्यादौ परत्वाद्विकरणोऽनुदात्त इति तङि तङ् इत्यादिनियमानुपपत्तिस्तेन व्यवधानादत आह॥ ६०॥ विकरणेभ्यो नियमो बली
यान्॥ अत्र वृद्भ्यः स्यसनोरिति सूत्रेण स्ये विभाषा तङ्विधानं ज्ञापकं। अन्यथा स्यव्यवधाने नियमानामप्रवृत्तौ सामान्यशा
स्त्रेणोभयसिद्धौ विकल्पविधानं व्यर्थं स्यात्। अत्रार्थे ज्ञापितेन तु स्य इति तत्र विषयसप्तमी बोध्येति। अनुदात्तङित इत्यत्र भा
ष्ये कैय्यटयोः स्पष्टं। विकरणव्यवधानेऽपि नियमप्रवृत्तेरिदं ज्ञापकमिति शब्देन्दुशेखरे इत्यत्र भाष्ये ध्वनितं। वस्तुतो स्यात् ज्ञापकं
अतङीति च्छेदे परस्मैपदे इति नार्थः॥ तङीति च्छेदे परस्मैपदविकल्पेन पक्षे तङ्विधानमित्यर्थ इति कश्चित्। विकल्पविधानानीति पाठः
उपपादनपर्यालोचनया तु अयमेव पाठो युक्त इति भाति॥ न॰ ३

प. भा. शे.
२०

दनुदात्तादि॰ तद्धत्यादि प्रकरणांतेवादिविधेकत्वाव्ययतया विधायकं तत्र धातोरितिविहितपंचमीतित स्समानाधिकरणामनुदात्ते॰
तद्धत्यादिविहितत्वविशेषणमेवं च लाघवस्थापि संपित व्यवधानेपितद् सिद्धिः। शबादिभ्यस्तु एवमेवनियमः। यद्वालमात्रपेक्षत्वादंत
रंगा आदेशा उकारविशेषापेक्षत्वान्स्याद्यो वहिरंगा इत्तितिदिग्योगलक्षणापंचम्यामपिनदोषः। अत्रपक्षेवृद्ध्यः स्येतिसूत्रेस्य वि
षयेतिव्याख्येयं आत्मनेपदशब्दादैभाविसंज्ञाश्रयणीयेतितत्वं। भिन्नवाक्यतया सामान्यशास्त्रविहितानां नियमे लुगादिनेवानिय
मेनजातनिवृत्तिरंगीकार्या। भुक्तवंतं प्रतिमाभुवया इति ब्रूयात् किं तेन कृतं स्यादिति न्यायस्तु नात्र शास्त्रेणाश्रयितुं शक्यः नियमा
दिशास्त्राणां वैयर्थ्यापत्तेः। ध्वनितं चेदं स्थानेंतरतम इति सूत्रे भाष्ये शास्त्रानर्थक्यं तु वृद्धिः संज्ञासूत्रे भाष्ये तिरस्कृतं। सामा
न्यशास्त्रेणोत्पतिस्तु स्वरूपसत्त्वं स्त्वैकपदी साप्रधानानुरोधेन गुणाभेदकल्पनातावन्मात्रकृतिकल्पनाकार्याग्रन्यायनिवृत्तौच
नत्कल्पितवत्वकृतेरपेनिवृत्तिः कल्प्यतेतिगौरवमित्यन्यत्र विस्तरः। ४१॥ परान्नित्यं बलवत् नत्कृताकृतप्रसंगित्वान्नित्॥ तत्राकृता २०

भावकस्योत्पाभावकल्पनापेक्षया कृताभावकस्यैव तत्कल्पनमुचितमिति नित्यस्य बलवत्वे बीजं तदाह। कृताकृतप्रसं
गिनित्यं तद्विपरीतमनित्यं। अत एव तुदतीत्यादेः परादपि गुणान्नित्यत्वाच्छप्रत्ययादिर्भवति। यद्व्यक्तिसंबंधितयाखंप्र
वृत्तिस्तद्व्यक्तिसंबंधितयैव पुनः प्रवृत्तौ कृताकृतप्रसंगित्वमित्याशयेनाह॥ शब्दांतरस्य प्राप्नुवन्विधिरनित्यो भवति॥ इदं श
द्वेःशितइतिसूत्रे भाष्यस्पष्टं॥ तत्र हि स्नाविशंते सत्र विकरणे कृते नदं तुस्याद् अकृते धातुमात्रस्येत्यनित्यतिद्दुक्तं॥४३॥ कृष्यति ५
एतनुसन्यायेनाह॥ शब्दांतरात्प्राप्नुवतः शब्दांतरे प्राप्नुवतश्चानित्यत्वं॥४४॥ एतन्मूलकमेवाह। लक्षणांतरेण प्राप्नुवन्
विधिरनित्यः। अनिदेशविषये॥ इयमासिद्धवत्सूत्रे कैय्यटेनोक्ता॥४५॥ यदानुशास्त्रव्यतिरेकेण तद्विधेयकार्ययोरेवनि
त्यत्वादिविचारोयदापिव्यक्तिविशेषाश्रयणाभावस्तदाह॥ क्वचित्कृताकृतप्रसंगित्वमात्रेणापिनित्यता॥ कृतद्विती
येनित्यत्वेनाभिमतस्यप्रसंगमात्रं नित्यत्वव्यवहारे प्रयोजकं॥ ननु बाधकाबाधितफलोपहितप्रसंगस्तथेतिभावस्त
त्रहिनृस्तमप्यान्तेदेणोज्ञापकभाष्यकव्याख्यापरे कुर्वइत्यत्र गुणोकारलोपयोमध्येगुणस्योकारलोटेप्राप्नयउलक्षणेनशप्तस्यानित्यत्वमुक्तं॥ एवं च कुर्वर
त्यत्रोत्वंनस्यादितिबोध्यं॥ ४३ एतदुदाहरणं तुदतीत्यादि त्रिचनिमतताच्छ ४२

तन्नुमित्यत्रात्वलुकोः संप्रधारणायामत्वे कृते ऽ नोमित्यस्याबाधितस्य लुको निमित्तत्वमुक्तं ॥ स्वमोर्नपुंसकादित्यत्र भाष्ये तदादाय कैयटेनेयमुक्ता ॥ पर
तत्र हि स्वः कर्तो इत्यत्र दोनास्त्तुदात्वेति तेनि घातेद्धा देशो षोडशिस्य निसत्वमुक्तं ॥ ४

प. भा. शे. २१

दाह ॥ ४६ ॥ यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यं ॥ ४७ ॥ क्वचित्तु बाधकाबाधितफलोपहितप्रसंग एव ग्रहणं तेन दाह्याय
स्य च लक्षणान्तरेण निमित्तं विहन्यते न तदप्यनित्यं ॥ सत्यमेकेऽप्यटेन एतदुपष्टंभकं लोकव्यवहारमुदाहृतं । वालिसुग्रीवयो
र्युध्यमानयोर्भगवता वालिनि हतेपि सुग्रीवस्य वालिनः प्राबल्यं न व्यवहरन्ति ॥ भगवत्सहायैः पांडवैर्जये लब्धेपि पांडवानां
प्राबल्यं व्यवहरंति चेति सर्वं चेदं लक्ष्यानुरोधाद्व्यवस्थितं ॥ ४८ ॥ लुटः प्रथमस्येति सूत्रे भाष्ये स्वरभिन्नस्य च प्राप्नुवन्विधि
रनित्यो भवतीति पठ्यते ॥ ४९ ॥ यत्र त्वेकस्यैव कार्यस्य परत्वं नित्यत्वं च तत्रेच्छयान्यतरदुभयं वा तस्य बलवत्त्वे नियामकमुक्ते
रवं ॥ अत एव तत्र परत्वान्नित्यत्वाच्चेति भाष्ये उच्यते ॥ न स्फुतस्तत्र परत्वादित्युक्तिरेकदेशिनः स्पष्टं चेदं विप्रतिषेधसू
त्रे कैयटे । यो ऽचि इति सूत्रेपि स्यानित्यत्वांतरंगत्वयुक्तौ हितस्य प्रथमतः प्रवृत्तौ नित्यत्वादि सेव भाष्ये उक्तं ॥ नित्यांतरंगयो
र्बलवत्त्वमपि योगपद्यासंभवे एव बोध्यं ॥ नित्यादप्यन्तरंगं बलीयोंतरंगे बहिरंगस्यासिद्धत्वात्तदाह ॥ असिद्धं बहिरंग २१

ऽलक्ष्या प्रतिपदोक्तपरिभाषा आनेत्याद्युक्ते ॥ एवं च हरयो मन्त्र लाक्षणिके कार्ये विरोधो यथा यावदिन्यस्य प्रवृत्ति । एवं च पचावेदमितिव ... लाक्षणिके हि लक्ष्यानुसंधानेहा
रा प्रतिपत्ति बहिरंगा प्रतिपदोक्ते तत्वतरंगेति कृदाधा घृदावितिसूत्रस्य कैयटे न लक्षणेति परिभाषा अन्तरंगपरिभाषा अनुवादिके तिसमाधीयते ॥ अनुवरद फलं तु गमादे
तिनिषेधः पूर्वत्रासिद्धीयेति अनुवादस्य फलं तस्य दोष इति वत् ॥ १२

मंतरंगे ॥ अंतर्मध्ये बहिरंगशास्त्रीयनिमित्तसमुदायमध्ये अंतर्भूतानि अंगानि निमित्तानि यस्य तदन्तरंगं ॥ एवं तदीयनिमित्तस
मुदायाद्बहिर्भूतांगकं बहिरंगं ॥ एतच्च खरवसानयोरिति सूत्रे ऽसिद्धवत्सूत्रे च भाष्यकैयटयोः स्पष्टं ॥ अन्तरंगशब्देन शब्दस्वरूपनि
मित्तमप्युच्यते शब्दशास्त्रेऽस्य प्रधानत्वात् ॥ तेनार्थनिमित्तकस्य न बहिरंगत्वं ॥ अत एव नानीत्वितिनिषेधश्चरितार्थः ॥ अन्यथा
स्त्रीत्वरूपार्थनिमित्तकतित्वपेक्षयान्तरंगत्वात्त्रयादेशे तदसंगतिः स्पष्टैव ॥ अत एव प्रैत्रयादेशस्यान्तरस्य प्रतिषेध इति स्थानिव
त्सूत्रस्थभाष्यवार्त्तिकादि संगच्छते ॥ एतेन गोधेरः पचेरन्नित्यादी एयादिनामंगसंज्ञासापेक्षत्वेन बहिरंगतया ऽसिद्धत्वाद्व
लिलोपो न स्यादिति परास्तं ॥ एयादेशादेः परनिमित्तकत्वेनान्तरंगत्वाच्च ॥ ननु येन नाविधिस्तदन्तस्येति सूत्रे भाष्ये इकोयण
चीत्यादावपि तदंतविधौ स्यान्दृसञ्चान्तरंगत्वाल्लघूपधगुणबाधकत्वमिष्यते तन्न सिध्येत् ॥ ऊनशब्दमाश्रित्य यणादेशो
न शब्दमाश्रित्य गुण इत्यन्तरंगत्वाद्यणादेश एव स्यादित्युक्तमत्र कैयटः ॥ सिवेर्बहुलं काद्यौणादिके नप्रत्यये गुणवलोपौ
ननु अंतरंगत्वाज्ज्ञानात्पिन्नयादेशो ऽन्तरंगप्रवृत्तेर्बहिरंगशास्त्रप्रवृत्तेः सर्वसमनत्वेन यस्त्वा निमित्तादेशजातेन तिस्थित्यस्य सोऽर्थस्यान्वयं तत्र एकलोपपादनमि
ति चेन्न ॥ अर्थकृत बहिरंगत्वे स्वाश्रयपोस्त्र्यर्थनिमित्तकतिस्त्रपेक्षयान्तरंगत्वात्त्रयादेशे पूर्वात्तिस्रादेशोपि नामीति दीर्घ इष्यादस्त्र्यर्थनिमित्तकत्वेन तिस्रादे
शस्य बहिरंगत्वादसिद्धत्वे दीर्घस्यैवाप्राप्त्या निषेधवैयर्थ्यं न तद्ज्ञापकत्वामिमास्ययात ॥ न चासिद्धत्वेपि त्रयादेशनुप्राप्ति स्त्रादेश एव दीर्घप्रवृत्तेनिषेधसार्थक्यमिति
वाच्यं ॥ निषेधदर्शनाधीतिस्त्रादेशस्यासिद्धत्वात ॥ अनुवादसामर्थ्यादसिद्धत्वाभावकल्पनेनुतत्सोऽर्थसामर्थ्यादर्थकृते बहिरंगत्वाभावकल्पनस्यैव न्याय्यत्वात् २१

प॰भा॰शे॰ प्रसंगेडुठपवादत्वाद्धलोपंबाधते॥ गुणोंतरंगत्वाद्बाधते॥ गुणोह्यंगसंबंधिनीमिग्लक्षणांलघ्वीमुपधामार्धधातुकं
२२ चाश्रयति। ऊठ्तुवकारांतमंगमनुनासिकंचप्रत्ययमित्यापेक्षत्वादंतरंगस्तत्रेहत्वेयणागुणोबाध्यतइति॥ एवंचसंज्ञाप
क्षस्यापिवहिरंगत्वंस्पष्टमेवोक्तमितिचेन्न॥ तदंतविधावपिबहुपदार्थापेक्षत्वरूपबहिरंगत्वस्यगुणेसत्वेनतत्रदोषक
थनपरभाष्यसंगतेः। वहिरंगांतरंगशब्दाभ्यांबहुपेक्षत्वाल्पापेक्षत्वयोःशब्दमर्यादयालाभाच्च। तथासत्यसिद्धंबहुपेक्ष
मल्पापेक्षेइत्येववदेत्। अतएवविप्रतिषेधसूत्रेभाष्येगुणाद्यणादेशोंतरंगत्वादित्यस्यस्योतइत्युदाहरणेननुगुणादृढंतर
गत्वादित्युक्तंलघ्वीमातदपिवक्तुमुचितंप्राथम्यात्तदेववावक्तुमुचितं। ममत्वंतरंगपरिभाषयातद्धारणासंभवान्नोक्तं॥
किंचसिद्धांतेनिमित्वाद्गुणात्सूत्रवंमूठ्गुणास्तुईदियणावाधितत्वात्नित्यः। ऊठ्नशब्दमाश्रीत्येत्यादिभाष्येणपरिभाषा
यामंगशब्दंनचसप्तम्याद्यंतोपात्तशब्दस्वरूपनिनिमित्तमेवग्रस्तइतिस्पष्टमेवोक्तं॥ यत्तुकैय्यटेनतदंतविधिपक्षेप २२

रत्वाद्गुणःप्राप्नोतीत्युक्तंतत्तुऊठ्नशब्दमाश्रित्येत्यादिभाष्यासंगत्याश्चिंत्यं॥ बालिलोपेंतरंगपरिभाषानप्रवर्त्ततइतितुनयुक्तं॥
तत्सूत्रभाष्येएववृत्रघ्नादिषुलोपात्प्रसंगमाशंक्योपदेशसामर्थ्यान्न॥ नन्वेवंवृश्चतोत्यादौचारितार्थ्यंबहिरंगतयासप्रसा
रणस्यासिद्धत्वेनप्रवृत्तमेवत्स्यादितिभाष्योक्तेः। यत्तुनलोपस्यषट्संज्ञायामसिद्धत्वात्पंचेत्यत्रनषाडितिनिषेधइतितच्चिं
त्यं। नलोपस्यहिपदसंज्ञापेक्षत्वेनबहिरंगत्वंवाच्यं। तच्चनसंज्ञाकृतबहिरंगत्वस्यानाश्रयणात्॥ पंचेत्यत्रनिषेधस्तुकि
यायत्राप्नोतितत्रैतिव्याख्यानसामर्थ्येनमतुप्रवृषट्त्वमादायेतिबोध्यं॥ अतएववक्ष्यतितुकृयरूपाचारितार्थंवृत्रहभ्या
मित्यादौपदत्वनिमित्तकत्वेपिनलोपस्यबहिरंगत्वाभावात्॥ भ्यामःपदसंज्ञानिमित्तत्वेपिनलोपस्यतन्निमित्तक
त्वाभावात्॥ परंपरयानिमित्तत्वमादायबहिरंगत्वाश्रयणेतुनमानं॥ ध्वनितंचेदंनलोपःसुप्स्वरेतिसूत्रेभाष्येइति
॥ तत्रैवभाष्यप्रदीपोद्योतेनिरूपितं। अंतरंगेकर्त्तव्येजातंतत्कालप्राप्तिकंचबहिरंगमसिद्धमित्यर्थः। वृत्रघ्नादिषुपदसं
स्कारपक्षेसमानकालत्वमेवद्वयोरितिबोध्यं। एतेनांतरंगंबहिरंगाद्बलीयइतिपरिभाषांतरमित्यपास्तं॥ एतनामा

३ तत्रहिसन्निपातपरिभाषयातन्नवडितं त्रि३

नन्विदं पेतिस्वरार्थंतरावन्तश्च कमिति कथंज्ञापकमितिवाच्यं॥ धूरित्याद्यवतत्र ग्रहणं नास्यो वद्दत्यस्य भाष्याभिप्रेतत्वात्॥ तथाहि॥ छोरिनत्रनित्वेनानिर्माद्दावश्यकेनास्मा
२ पिठित्वेप्रतिपादितेपिवाहऊठित्यत्रयथाश्रुताध्यायीपाठेदिवसंप्रसारणानुवृत्त्यादोषाभावेउक्तेतेनैवनिर्वाहेऊ ठ्ग्रहणस्यपरिभाषाज्ञापकत्वमात्रकलेवृत्व। द्वित्वं
एत्येधत्यूठ्स्विस्यवृविशेषवार्थंतथा। ऽसिमानत्वेनसिद्धांतितंभाष्ये॥ विश्वौहइत्यादौस्त्वशनुपपत्तिश्चनाशंकिता॥ तस्मात्यदित्वछोरिनिहित्ता॥ ऊठिदमितत्रसा
२ सीयपान्वृत्यमोपास्थितत्वाच्छठितएवग्रहणंनादित्तः अत्रवाहऊठ्छोरितिसूत्रद्वयभाष्याद्दितः परइत्यत्रवृद्धिरेत्येत्तत्रेणाभयोरपिग्रहणान्स्रूलभइतित्तदाशयः॥
प.आ.शे. ध्याभित्वविप्रतिषेधसूत्रेभाष्येनस्याः प्रमारव्यानाच्च। अंतरंगशास्त्रत्वमस्यालिंगं। इयंनिपाद्यानप्रवर्तते। त्रिपाद्याभसिद्ध
२२ स्यैत्वात्॥ अस्यांचवाहऊठसूत्रस्यऊठ्ग्रहणंज्ञापकमिति॥ एषासपादसप्ताध्यायीस्था। अन्यथासंप्रसारणमात्रविधानेन
ऊघूपधगुणोवृद्धिरेचीतिवृद्धौविश्वौहइत्यादिसिद्धेस्तद्वैयर्थ्यंस्पष्टमेव॥ ससांतस्याबहिरंगसंप्रसारणस्यासिद्धत्वाल्लघू
पधगुणोनस्यात्। नचपुगंतेतिसूत्रेनिमित्तमिकोविशेषणं। अतएवभिनत्तिस्यादेरगुणोन। एवंचनाजानंतर्यमितितिषे
धात्कथंपरिभाषाप्रवृत्तिरस्त्वितिवाच्यं। प्रत्ययस्यांगाशेउस्थिताकांक्षत्वेनतत्रैवान्वयात्। पुगंतेत्यादौकर्मधारयाश्र
यणेनप्रत्ययपरांगावयवलघूपधारूपेकोगुणइतिइकोगुणवृद्धीतिसूत्रेभाष्यसंमतेर्थेभिनत्तीत्यादावदोषाच्च। आ
कारांतोपसर्गेनकारांतेचोपपदेवहेर्णिवविचावनभिधानान्नतत्रएव। वार्युहइत्यादितुऊहतेर्क्विपिबोध्यं॥ धातुना
मनेकार्थत्वात्नार्थासंगतिः। प्रौहइत्याद्यसाधुरेव। वृद्धप्राप्तः। अस्याहृस्यानर्थक्यान्नप्राद्दौहेत्यस्यापिप्रवृत्तिः। नच
छोरितिसूत्रस्थपादित्वर्हिइत्यादिभाष्यमेकदेश्युक्तिः। आकारांतोपसर्गोदौवहादेर्णिघनन्निषानवच्छोरितिसूत्रेभाष्येकेरूनयोस्थित्वामितिपक्षेपीदंसर्वंबोध्यं॥ २७

कार्यकालपक्षेत्रिपाद्यांनस्यवृत्तिर्द्वारेत्तिवाच्यं। पूर्वंप्रतिपरस्यासिद्धत्वादंतरंगाभावेनपूर्वस्मान्निरूपितबहिरंगत्वाभा
वात्तयातस्यासिद्धत्वप्रतिपादनासंभवात्। नचानयापूर्वस्यासिद्धत्वाद्भावेनतंप्रतिपरासिद्धत्वंपूर्वत्रेत्यनेनैवक्रमश
कमितिवाच्यं। एवंहिविनिगमनाविरहादुभयोरप्यप्रवृत्त्यापत्तेः। किंचपूर्वत्रेत्यस्यप्रत्यक्षत्वेनतेनानुमानिकस्याअस्याबा
धएवोचितः। अतः कार्यकालपक्षेपित्रिपाद्यामस्याअनुपस्थितिरेव। अतएवकार्यकालपक्षमेवोपक्रम्योक्तयुक्तीरुत्वा
ततोऽयुक्तोयंपरिहारोनवाबहिरंगलक्षणत्वादित्युक्तंविसर्जनीयसूत्रेभाष्येसिद्धांतिना। त्रिपादीस्थंतरंगेकर्तव्ये
यंपरिहारोनयुक्तइतितदर्थः। किंतुवचनमेवकर्तव्यमितितदाशयः॥ अतएवनिगाल्यतइत्यादौलत्वार्थंतस्यदोषु
इतिवचनमेवारब्धं। अन्यथाऽन्तरंगत्वाण्णिलोपात्पूर्वंवैकल्पिकलत्वेनतद्वैयर्थ्यंस्पष्टमेव। येपिलक्ष्यानुरोधादानु
मानिकस्याप्यंतरंगपरिभाषयाप्रत्यक्षसिद्धस्यपूर्वत्रेत्यस्यबाधंवदंति। तेपिलक्षणचक्षुषोनिनादरणीयाइतिदिक्
ऽअतएवौमाङोश्चेत्यौउ्ग्रहणंचरितार्थं। नह्यत्रवद्धुआङ्हेत्यत्रपरमपिसवर्णदीर्घंबाधित्वांतरंगत्वाद्गुणोभवेत

प.भा.शे. वृद्धिप्राप्तौ पररूपार्थं। साधनबोधकप्रत्ययोत्पत्त्यनन्तरं पूर्वं धातोरुपसर्गयोगे पश्चात्तद्वाशब्दसमुदायेन योगा
२४ हुपास्यान्तरंगत्वामिति संप्रसारणाच्चेति सूत्रे भाष्ये स्पष्टं। एहीत्यनुकरणस्य शिवादिशब्दसंबंधे तु नास्य प्रवृत्तिरुप
के परसंप्रसारणाच्चेति सूत्रस्थभाष्यप्रामाण्येनानित्यं प्रकृतिवदनुकरणमित्यतिदेशमादायोलव्याङ्त्वेन एतद
प्रवृत्तेः। यत्तु पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेन। उपसर्गेण तत्संज्ञकशब्देन॥ साधनेन कारकेण न त्वपु
क्तकार्येण। अत एवानुभूयत इत्यादौ सकर्मकत्वात्कर्मणि लकारसिद्धिरिति तन्न। क्रियायाः साध्यत्वेन बाध्या
त्साध्यस्य च साधनाकांक्षतया तत्संबंधोत्तरमेवानिश्चितक्रियाबोधेन साधनकार्यप्रवृत्त्युत्तरमेव क्रियायोग
निमित्तोपसर्गसंज्ञकस्य संबंधौचित्यात्। अत एव सुट्कात्पूर्वं इति सूत्रे पूर्वं धातुरुपसर्गेणेत्युक्तेन तत्सारपूर्वं धा
धंतु साधनेन पश्चादुपसर्गेणेत्युक्तेऽप्युक्ता। ऽस्यैव युक्तत्वमुक्तं। साधनं हि क्रियां निर्वर्तयतीत्यादिना। उपसर्गयो
त्याप्यंतरभावेण धातुनैवार्थाभिधानादुक्तेषु कर्मण्यिलकारादिसिद्धिः। पश्चाच्छ्रोतुर्बोधाय द्योतकोपसर्गसंबं २४

धः। एवं चान्तरंगतरार्थकोपसर्गनिमित्तः। सुट्समस्कृतिः त्यवस्थायां द्वित्वादितः पूर्वं प्रवर्तनतये तो द्वित्वादि। अत एव
प्रणिदापयतीत्यादौ णत्वं यदागमा इति न्यायेन समाहितं भाष्ये। अत एव प्रत्यतिप्रत्यय इत्यादिसिद्धिः। अन्यथान्तरंग
त्वात्सवर्णदीर्घरूपासिद्धेः। यदुपसर्गनिमित्तकं कार्यमुपसर्गार्थाश्रितं विशिष्टोपसर्गनिमित्तत्वादन्तरंगं। यत्तु न।
तथा तत्र पूर्वांगत्वं साधननिमित्तकमेवान्तरंगं। अत एव न धात्विति सूत्रे प्रेद्धं इत्यत्र गुणो बहिरंग इति भाष्ये उक्तं।
किंच पूर्वमुपसर्गयोगे धातूपसर्गयोः समासे एकस्वर्याद्यापत्तिरिति उपपुपुदमिति सूत्रे भाष्ये स्पष्टं। भावार्थप्रत
यस्यापि पूर्वमेवोत्पत्तिः। अत एव घञोऽपवादेनेवृत्तमि। निनिर्देशः संगच्छते। शेद्रूदं च सामान्यापेक्षं ज्ञापकं भावतिङः
पि पूर्वमुत्पत्तिः। अन्यथा तत्र समासापत्तिः तिङि त्वतिङ इति निषेधान्न दोषः। यदि भावतिङ उपसर्गयोगोत्तस
ले। यत्तु विशेषापेक्षात्सामान्यापेक्षमन्तरंगं विशेषापेक्षे विशेषधर्मस्याधिकस्य निमित्तत्वात्। यथा रुदादिभ्यः
सार्वधातुके इत्यत्र रुदादित्वं सार्वधातुकत्वं च तत्र सार्वधातुकत्वज्ञाये नो प्रकृते धातुत्वज्ञानं प्रत्ययस्य प्रत्यय

त्वन्नानं चावश्यकमिति यासुडंतरंगः॥ एतेनयदनुदात्तङिः तदृतिसूत्रे कैयटेनोक्तं। लमात्रापेक्षयां ऽतरंगास्तिवा
दयो लकारविशेषापेक्षत्वाद्बहिरंगास्स्यादयइति परास्त्रं। विशेषापेक्षत्वेपि तस्य सामान्यधर्मनिमित्तकत्वाभावेन
तस्यदुरूपपादत्वात्॥ परनिमित्तकत्वेन स्यादीनां बहिरंगत्वाच्चेति तन्न॥ विशेषस्य व्याप्यत्वेन व्यापकस्यानुमाने
नोपस्थितावपि तस्यानिमित्तत्वे मानाभावेनाधिकधर्मनिमित्तकत्वानुपपदनात्॥ भाष्ये एवं विधांतरंगबहिरंगभा
वस्य काप्यनुक्तेरवाच्च। यत्तु मतुस्सूत्रे भाष्ये पंचगावोयस्य संति स पंचगुरित्यत्र मतुप्प्राप्नोतीत्याशंक्य प्रत्येकमसा
मर्थ्यात्समुदायादप्रातिपदिकत्वात्समासात्समासेनोक्तत्वादिति सिद्धांतिनोक्ते नैतत्सारमुक्ते पिहि प्रत्ययार्थ
उपुष्यते द्विगोस्तद्धितो यथा पांचनापितिरिति एवं पस्युक्तिर्भाष्ये द्विगोर्लुगनपत्ये इति लुग्विधानात्तद्धितार्थे द्विगो
स्तद्धितो पंचगुशब्दाद्विगुरितितदाशयः कैयटः॥ ततो द्वैमातुरः पंचनापितिः पंचसु कपालेषु संस्कृतः इत्यादौ सा
वकाशद्विगोर्बहुव्रीहिणा प्रकृते बाधइत्याशयकेन नैषुद्विगुः कस्तर्हि बहुव्रीहिरिति सिद्धांतिनोक्ते नमवकाशम

ज्ञानानोपचारत्वात्। द्विगुः प्राप्नोतीति पूर्वपक्षी। अन्यपदार्थेसुबंतमात्रस्य विधीयमानबहुव्रीहेस्संख्यायास्तद्धितार्थे
विधीयमानो द्विगुर्विशेषविहितत्वाद्बाधकः प्राप्नोतीति कैयटः॥ ततः सिद्धांत्येकदेश्याह अंतरंगत्वाद्बहुव्रीहिः कांतरं
गता अन्यपदार्थे बहुव्रीहिर्विशिष्टे ऽन्यपदार्थे द्विगुस्तस्मिंश्चास्य तद्धितेअस्ति ग्रहणांनिष्यत्तेइ स्यधिकास्य पेक्षत्वे
न अर्थनिमित्तो द्विगुर्बहिरंग इति कैयटः॥ नैषा सिद्धांतयुक्तिरेनावत्ताप्यपवादत्वाहानेः। अचू सामान्यापेक्षयणो
विशिष्टसवर्णाज्ञपेक्षदीर्घेण बाधदर्शनात्। किंचोक्तरीत्या परत्वेनैव बाधासिद्धेः॥ किंचात्राधिकापेक्षत्वेनैवब
हिरंगत्वं न केवलं विशिष्टापेक्षत्वेनेति नैतज्ज्ञापकारूढं विशेषापेक्षस्य बहिरंगत्वं॥ अतएव सुबंतसामान्यापेक्षो ब
हुव्रीहिस्तद्विशेषापेक्षो द्विगुरिति नोक्तं भाष्ये। नचार्थकृतबहिरंगत्वानाश्रयणादिदमयुक्तं।। एकदेश्युक्तित्वेनादो
षान्। अतएव अस्ति ग्रहणं नोपाध्यर्थं किं त्वस्तिशब्दान्मतुबर्थमिति त्वदभिमतं। बहिरंगत्वमपि द्विगोर्नास्तीत्यतित्र
निपायसिद्धांतिनामत्वर्थे द्विगोः प्रतिषेधकं वक्तव्य इति वचनेनेतत्सिद्धमितिउक्तं। अतएव न दोः सस्मावितिसूत्रे ऽ

न्तयोरितिविचारितार्थः। अन्यथाप्रत्ययसामान्यापेक्षत्वेनांतरंगत्वाद्ङ्यस्यात्वेऽनंत्यस्यैव सत्वे सिद्धे तद्वैयर्थ्यस्य
स्पष्टमेव। पादः पदिति सूत्रे भाष्यकैयटयोरप्येतदंतरंगाभाव एव सूचित इति सुधियो विभावयंतु॥ नन्वेवं असुषुव
दित्यत्र लघूपधगुणादुवङोऽनिमित्तत्वाभावादुवङ् न स्यादिति चेन्न। तत्रांतःकार्यित्वरूपांतरंगसत्वादंतःकार्यित्वं
च पूर्वोपस्थितनिमित्तकत्वं। अंगशब्दस्य पंनिपरत्तमित्वात्। इदमंतरंगं लोकन्यायसिद्धमिति। मनुष्योऽयं प्रातरु
त्थाय शरीरकार्याणि करोति ततः सुहृदां ततः संबंधिनामर्थानामपि जातिव्यक्तिलिंगसंख्याकारकाणां बोधक्रम
ः शास्त्रकृत् कल्पितस्तत्क्रमेणैव तद्बोधकशब्दप्रादुर्भावः कल्पित इति क्रमेणैव तत्कार्योपत्तीति पदो स्यादावंतरंग
त्वात्सर्वं पूर्वं यणादेशः परयणादेशस्य बहिरंगतयाऽसिद्धत्वादित्यादिना अचः परस्मिन्निति सूत्रे भाष्ये स्पष्टं। तदपि
युगपत्प्राप्तौ पूर्वप्रवृत्तिनियामकमेव। यथा पद्वावित्यत्र पदस्य विभज्यान्वाख्याने॥ न तु जातस्य बहिरंगस्य तादृशेंऽतरं
गेऽसिद्धतानियामकं प्रागुक्तलोकन्यायेन तथैव लाभादिति वाहऊठ्सूत्रे कैयटे स्पष्टं॥ अत एव वाहोरित्यादौ वलि २६

लोपो यणः स्थानिवत्त्वेन वारितो भाष्यकृता॥ क्रमेणान्वाख्याने तूक्तोदाहरणे पूर्वप्रवृत्तिकत्वमंतरंगत्वं बहिरंगस्यासि
द्धत्वमपि निमित्ताभावादप्राप्तिरूपं बोध्यं। यत्त्वेवं रीत्या पूर्वस्यानिकमप्यंतरंगमिति तच्चिंत्यं। स्रजिष्ठ इत्यादौ विन्मतोर्लु
कि टिलोपस्यापवादविन्मतोर्लुक्प्रवृत्त्या जातिपक्षाश्रयणेन वारणस्य शेखरे एकाजिति सूत्रे प्रयोजनखंडनावसरे भा
ष्यकृता कृतत्वादस्य नैष्फल्यापत्तेः॥ त्वदुक्तरीत्या विन्मतोर्लुको बहिरंगासिद्धत्वेन अनायासस्तद्वारणात्। भाष्यदृष्टरीत्या
बहिरंगासिद्धत्वस्य क्वाप्यनाश्रयणाच्च। परिभाषायामंगशब्दस्य निमित्तपरत्वाच्च। इयं चोत्तरपदाधिकारस्य बहिरंग
स्यानासिद्धत्वबोधिके नीचं एकाचामिति सूत्रे भाष्ये पूर्वपस्युक्तिरिति सा नादृत्ता। परंतु परत्वादावनुस्वारेणासिद्ध
त्वं मुमः निपाद्युत्तं तदप्रवृत्तेः। नव्यमतेऽपि यथोद्देशपक्षाश्रयणेनान्यथासिद्धोदाहरणदानेन तस्य तदुक्तित्वमावश्यक
मित्याहुः। आभीयेंऽतरंगे बहिरंगे आभीयस्य बहिरंगस्य समानाश्रयस्य नाने नासिद्धत्वमसिद्धत्वादित्यसिद्धवत्सूत्रे
भाष्ये स्पष्टं॥ एवं सिचिवृद्धेर्येन नाप्राप्तिन्यायेनांतरंगबाधकत्वमलुकं नासिध्यंतरंगमस्तीतीको गुणेति सूत्रे भाष्ये स

ष्टं॥ ॥॥नन्वेवमक्षद्यूरित्यादौ बहिरंगस्योठोऽसिद्धत्वादंतरंगो यण् न स्यादत आह। नाजानंतर्ये बहिष्ट्वप्रक्लृप्तिः॥ ॥अत्र
षत्वतुकोरसिद्ध इति सूत्रस्थं तुग्ग्रहणं ज्ञापकं। अन्यथाधीत्येत्यादौ समासोत्तरं ल्यपुत्पत्त्या पूर्वं समासे जाते तत्र संहिताया
नित्यत्वाल्ल्यबुत्पत्तिपर्यंतमप्यसंहितयावस्थानासंभवेनैकादेशस्यापि तुगपेक्षया पदद्वयसंबंधिवर्णद्वयापेक्षैकादेश
स्य बहिरंगतयाऽसिद्धत्वेन वैयर्थ्यं स्पष्टमेव पदद्वयसंबंधिवर्णद्वयापेक्षं बहिरंगमिति प्रेद्ध इत्यादौ गुणो बहिरं
ग इति ग्रंथेन न धातुलोप इति सूत्रे संयोगांतस्य लोप इति सूत्रे भाष्ये स्पष्टं। यत्तु षत्वग्रहणमपि ज्ञापकं। अन्यथा कोऽसि
चदित्यादौ पदद्वयसंबंधिवर्णवर्णद्वयापेक्षत्वेन बहिरंगस्य एकादेशस्यासिद्धत्वेन षत्वाप्रवृत्तौ किं तेनेति तन्न।
इणः षत्वं पदसंबंधित्वेन षत्वस्यापि पदद्वयसंबंधिवर्णद्वयापेक्षत्वेन उभयोः समत्वादेकादेशस्य परादिवत्त्वेनासिचदि
त्यस्य पदत्वेन पदादित्वाभावान्न सात्पदाद्योरित्यनेन निषेधः। त्रैपादिके उत्तरांगकार्यकालपक्षेऽपि बहिरंगपरिभाषाया
अप्रवृत्तेः पूर्वमुपपादितत्वाच्च। परिभाषार्थस्तु अन्तो नानंतर्यनिमित्तके अंतरंगे कर्तव्ये जातस्य बहिरंगस्य बहिष्ट्वप्रक्लृप्ति २१

ने बहिःपदेन बहिरंगत्वस्य भावो बहिरंगत्वं तत्प्रयुक्तासिद्धत्वस्य न प्रक्लृप्तिः न प्राप्तिरिति। असिद्धं बहिरंगमंतरंग इत्यु
क्ता नाजानंतर्य इति वक्ष्यामीति भाष्यात्। तथा तत्र सस्यांतरंगे इत्यस्यानुवृत्तिसूचनात्। तेन पचावेदमित्यादौ न दोषः। अं
तरंगस्याच्सम्यानिककार्यस्यैवस्यानानंतर्यनिमित्तकत्वाभावात्। जातस्य बहिरंगस्येत्युक्त्याऽपजर्दुधीयतीत्यादौ ब
हिरंगगुणादेरसिद्धत्वं सिद्धं। अत एव वृक्ष्णुशीनामाकुणः सवर्णदीर्घत्वाच्च चङ्गं तस्यांतरंगलक्षणत्वादिसंगच्छते। अत एव
वामा उः श्वेत्याङ्ग्रहणं चरितार्थं। तद्धि शिवआ इहि स्यातिस्यपि ते परमपि सवर्णदीर्घं बाधित्वा धातूपसर्गकार्यत्वेनांतरं
गत्वाद्गुणो वृद्धिबाधनार्थं। न चाक्षद्यूरित्यत्र यणि कृते ऊठो असिद्धत्वाद्वलि लोपापत्तिरिति वाच्यं। अचो नानंतर्यनि
मित्तेंतरंगे कर्तव्ये कृते च तस्मिन्पदंतरंगप्राप्नोतीति तस्य च कर्तव्ये नासिद्धमिति तदर्थात्॥ असिद्धपि भाषाया अनित्य
त्वेन न द्वारेणासस्यावैयर्थ्यं तेनैव सिद्धेः। अत एव न लोपः सुब्विति सूत्रे कृति तुग्ग्रहणं चरितार्थं। अन्यथा वृत्रहभ्या
मित्यादौ बहिर्भूतनम्यान्निमित्तकपदत्वाश्रयणेन बहिरंगतया नलोपासिद्धत्वेनासिद्धे तद्वैयर्थ्यं स्पष्टमेव। ममतु तु

प.भा.शे. किं अजानंतर्यसत्त्वान्न दोषः। नन्वेवं सातिह्रस्वस्यापीतीति सूत्रस्थभाष्यविरोधः। तत्र हि ग्रामणिपुत्र इत्यत्र इको ह्रस्वोऽङ्य इ
२८ ति ह्रस्वे कृते तुकमाशंक्य ह्रस्वस्य बहिरंगासिद्धत्वेन समाहितं। नाजानंतर्य इत्यस्य सत्वे तत्र तदप्राप्तेरसंगतिः स्पष्टैवे
ति वाच्यं तेन भाष्येणास्या अनावश्यकबोधनात्॥ तज्ज्ञापकेनांतरंगपरिभाषाया अनित्यत्वबोधनस्यैव न्याय्यत्वात्॥
अत एवाचः परस्मिन्निति सूत्रे पटुई आह इत्यत्र परयणादेशस्यानया ऽसिद्धत्वात्पूर्वयणादेशः साधितः। अत एवैषा भाष्ये
पुनः स्थापितोक्तेति वा। अत एवांतरंगपरिभाषामुपक्रम्य विप्रतिषेधसूत्रे अस्याः बहूनि प्रयोजनानि संति तदर्थमेषा
परिभाषा कर्तव्या। प्रतिविधेयं दोषाः सिव्वुत्तक्ते संप्रसारणाच्चेति सूत्रे भाष्ये प्रतिविधानं च परिभाषाविषये ऽनित्यताज्ञा
पनमेवेति ध्वनितमित्युक्तं। नन्वेवं गोमान्प्रिय इत्यादौ पदद्वयनिमित्तकसमासाश्रितत्वेन बहिरंगं लुकं बाधित्वांतरंगा
त्वान्नुम् स्वादिलोपे नुमादयः स्युरत आह। अंतरंगानपि विधीन्बहिरंगो लुग्बाधते॥ अत्र च प्रत्ययोत्तरपदयोश्चेति सू
त्रं ज्ञापकं। तत्र हि त्वत्कनमित्यादौ लुगपेक्षयांतरंगत्वाद्विभक्तिनिमित्तकेन त्वमावेकवचन इत्यनेन सिद्धे इदं व्यर्थं सज्ज्ञापकं २८

ऽननु तव पुत्रस्त्वत्पुत्र इत्यादौ तवममादिबाधनार्थं तदावश्यकमिति चेदेवं तर्हि अत्र मपर्यंतग्रहणानुवृत्तिस्त
ज्ज्ञापिकेति भाष्यकृतः। युष्मदादिभ्य आचारक्विप् तु न संपूर्णसूत्रस्य ज्ञापकता परभाष्यप्रामाण्यात्। हस्तनद्यापइ
ति नुट् विधायकसूत्रस्य भाष्यप्रामाण्येन हलंतेभ्य आचारक्विबभावाच्च। एवमेवैकार्थकाभ्यां प्रातिपदिकप्रकृतिकणि
चोऽप्यनभिधानं बोध्यं। एतेन तत्रादेशार्थं प्रत्ययग्रहणं चरितार्थमित्यपास्तं। ननु मपर्यंतानुवृत्तिरपि सर्वादेशत्व
वारणाय चरितार्था। न चोत्सर्गसमानदेशा अपवादा इति न्यायेनासिद्धवत्सूत्रस्थभाष्यसंमतेन मपर्यंतस्यैवादे
शे सिद्धे तदनुवृत्तिर्व्यर्थेति वाच्यं। तस्य श्रमकजादौ व्यभिचारादिति चेन्न। श्नमित्त्वेन बहुष्वे पुरस्तादग्रहणेनाक
च्प्रकृतेर्ग्रहणेन तस्य बाधेऽप्युत्सर्गस्य त्यागे मानाभावात्। अत एव तस्मिन्नणि चेत्यनेन युष्माकाद्यादेशविधा
नं चरितार्थं। अन्यथा आकजादेशमेव विदध्यात्। आकङ्नवकाद्यादेशयोरेतदपवादयोरुक्तन्यायेनांत्यादे
शत्वापत्तिरतस्तद्विधानमिदमेवं च ज्ञापकं। यद्यपि विरोधे बाधकत्वमिति वार्तिकमते यं न्यायः॥ भाष्यकारस्तु विना

पि विरोधं सत्यपि संभवे बाधकत्वमिष्यतीत्यनभिहितमस्त्रे कैयटरीत्यानायं नियमस्तथापि युष्माकाद्यादेशवि
धानज्ञापितउत्सर्गः स्वीक्रियत एवेति प्रकृते तेन दोषः। एतज्ज्ञाष्यमापितत्वमीकारेमानं। एवंचमपर्यंतानुवृत्तिस्त्व
त्कृतामित्यादौ मपर्यंतस्यादेशविधानार्था। तत्र चांतरंगत्वात्त्वमावित्येवासिद्धेर्व्यर्था सा एतज्ज्ञापिका ज्ञापितेपि
पिते पित्वमित्यिन्ने तद्विषये तवादीनामप्रादेशा तदपवादत्वाभावेन मपर्यंतस्यैवादेशार्थं चरितार्थेति तदाशयः
। यत्तु द्वारदत्ते नांतरंगप्रवृत्तौ प्रत्ययोत्तरपदे मपर्यंतासंभवेन तदनुवृत्तिर्व्यर्थासती ज्ञापिकेत्युक्तं तन्न अं
तरंगाणामपि अपवादैर्बाध्यत्वेन तद्विषये तदप्रवृत्तेः। नस्तुत्तद्धं ज्ञापकं वार्त्तिकरीत्यैव। भाष्यरीत्या तु वाचनि
क एवायमर्थ इत्याहुः। इयं सुपो धातु इति। लुग्विषये वेति केचित्। एउङ्स्यासंबुद्धेर्नयासयोरित्यादिसूत्रस्याकरणाभा
वेपनलुङ्गत्र विषया। आद्ये हेत्र पुः इत्यादौ अनेन न्यायेन लोपं बाधित्वा लुग्भवतीति भाष्ये उक्तं। अंत्ये तरंगास्त्र वि
धीन सर्वोपि लुग्बाधते नस्तु बलुगेव। अतएमनी स्नसइत्यादौ न लोपो न भवति। पचभिः ख—।भिः क्रीतः पंचख २९

द्व इत्यादावेकादेशात्प्रागेव टापो लुक्। अन्यथा कृते कादेशस्य लुक्यका— इत्यश्रवणं स्यादिति कैयटे उक्तं। एतद्वि
रोधाद्यन्तद्वाजस्येतिसूत्रे कैयटेनोक्तं। अंगानाति क्रांतो ऽसंगरस्य त्रसुपो। लुकि बहुवचनपरत्वाभावात्तद्वाजस्येति लुङ्
नस्यादित्यादिंत्याशंकापरभाष्यवाख्यावसरे अंतरंगानपीति न्यायेनापं लुक् सुब्लुको बाधकः स्यादित्याशंक्य सुब्लुक
एवानेन बलवत्त्वं बोध्यतइति तस्त्रो द्योतितुद्र ष्टव्यं। लुगपेक्षया लुको बलवत्त्वस्य वक्तुमशक्यत्वादिति तदाशंकासमा
धानं वक्तु युक्तं। अनेन न्यायेनअंतरंगात्तिमित्तविनाशकलुकस्तत्प्रयोजकसमासादीनांच प्राबल्यं बोध्यतइत्यन्यत्र
विस्तरः॥५२॥ ॥ नन्वेवं सोमेन्द्रे तरंगत्वात्गुणे पूर्वपदान्त्यस्य इन्द्रशब्दाभावेनेन्द्रस्य परस्येति वृद्धिनिषेधो व्यर्थो अंतादिवद्वा
वस्तु भयत आश्रयणे निषिध्यः। किंच वृद्धिरप्यत्र न प्राप्नोति अंतादिवत्त्वोभयाभावेपि पूर्वांतत्वेनैकादेशविशिष्टे पूर्वपद
त्वेनेन्द्रशब्दस्यैकदेशविकृतन्यायेनो भयत आश्रयणेनांतादिवदिति निषेधाभावेन तदाश्रयणेनचोत्तरपदत्वेपि तस्यानन्त्य
त्वात्। एकस्यैकादेशेन परस्य नित्येन यस्येति लोपेनापहारात्। नच परादिवद्भावेनैकादेशविशिष्टस्योत्तरपदत्वमेवार

ननु द्व्यायेघैवन्तरणास्मगतिरन्तरंगेसवर्णदीर्घे कृतेयेबहिरंगस्य द्वित्वस्यासिद्धत्वादिति चेन्न। नाजानन्तर्य इति निषेधस्य ज्ञापकत्वात्तस्या असन्देहम्
ज्ञापकपरभाष्यप्रामाण्यात् यो युगपत्संभवस्तत्र जातांशमाराय परिभा॰ ननु उत्तरपदाघस्त्वे मनादित्वज्ञावेनैवानेप
मितिन्यायः॥ किंतूत्तरपदत्वमादिवद्भावेनाघुत्वं तु व्यपदेशिवद्भावेनेति चेन्न। विप्रतिषेधसूत्रस्थ इद्वृद्धौ वेत्यादि निर्भाष्यप्रामाण्येनानादिवद्भावेनानीतधर्मस्य
पर्यवपद शिवद्भावे स्यामहेतेः॥२॥ नचैकदेशविकृतन्यायस्याकृपरिभाषाअप्रवृत्तेरतो न वृद्धः संपन्नस्यतिभाष्यासंगतिरिति वाच्यं॥ स्या

प॰भा॰शे॰
३०

स्त्विति तत्संभवादिति वाच्यं। उत्तरपदाघत्वस्यानिकलाद्धृत्वस्तदभावेनाप्राप्तेः नादृत्यान्तिदेशात्। अन्यथा स्वद्वा मिरि
त्याद्यवापि पूर्वांतत्वेनादंतत्वे भिसरेसापत्तिरिति भाष्येस्पष्टं। अतएव यवैषुकामेशमस्त्यादावंतरंगत्वाद्गुणवृद्धिर्न
स्यादित्याशंक्यैतं तदेकदेशमात्रस्य विकाराभावाच्च। तदुक्तं भाष्ये इद्वृद्धौ वचौ एकोयस्येतिलोपेनापहृतः परएकादेशो
नातो नक्तं वृद्धः संपन्नस्तत्र कः प्रसंगो वृद्धेरिति। मरुदादिभिरिद्धस्य छेदृद्धस्येव पूर्वं निपातः॥ न आह॥ एवं चोत्तर
पदनिमित्तकार्यात्पूर्वमंतरंगोप्येकादेशो न॥ ॥अनचनेद्धस्येतिनिषेधएवज्ञापकइत्यन्तादिवच्च विप्रतिषेधेपर
मिति सूत्रयोर्भाष्येस्पष्टं॥५३॥ नन्वेवमपि प्रधायप्रस्थायेत्यादौ अंतरंगत्वादित्वादिषु कृतेषु ल्यप् स्यादित्यत आ
ह॥ अंतरंगानपि विधीन्बहिरंगो ल्यब्बाधते॥ अदो जग्धिर्ल्यप्तिकितीति सूत्रे तिकितीत्येवासिद्धे ल्यब्ग्रहणमस्या ज्ञापकं॥ मदोज ३०
ग्धिरितिसूत्रेभाष्येस्पष्टं॥५४॥ नन्वेवमपीयायेत्यादौ ज्ञापकपरभाष्यप्रामाण्याद्यत्र जातांशयुगपत्प्राप्त्यंशयोर्युगपत्संभवस्तत्र जातांशमा
दृश्यपरिभाषाया अप्रवृत्तेः॥ तेन उरवतुरित्यादौ द्वित्वस्य दीर्घेकर्त्तव्ये नासिद्धत्वमिति बो

ननु द्व्यायेसा
घैवंतरणासंग
तिरंतरंगेसव
र्णदीर्घे कृते
ऽबहिरंगस्य
द्वित्वस्यासि
द्धत्वादिति चेन्न॥ नाजानन्तर्य इति निषेधस्य जागरूकत्वात्तस्या असत्तुपो ग्रहणा

निकृस्त्वस्य
कदेशविकृत
मापस्पतत्रा
पिप्रवृत्तेः

ध्पत्रं १

द्वित्वे कृते अंतरंगत्वात्सवर्णदीर्घत्वे तदसिद्धिरित्यत आह॥ वार्णादांगं बलीयो भवति॥ ॥ तेनांतरंगमपि सवर्णदीर्घं बाधि
त्वा वृद्धिरिति तत्सिद्धिः। अभ्यासस्यासवर्णइति इयङुवङ्विधायकसूत्रस्य मसवर्णग्रहणमस्याः ज्ञापकं॥ तद्धि इयतुरित्या
दिसिद्ध्यर्थं। एतत्परिभाषाभावे तु इयतुरित्यादावंतरंगेणासवर्णदीर्घेण बाधातदर्थं॥ इयङुवङोर्हि अभ्याससं
बंधनिमित्तकत्वाद्बहिरंगो। नचेयङपवादः येन नाप्राप्तिन्यायेनेयर्तेरित्यादिसकललक्ष्यप्राप्त्यपवादत्वस्यैवनि
र्णयादितिवाच्यः। परेतु एतत्परिभाषाभावे ऽभ्यासस्येति सूत्रमेव व्यर्थं। न चेयेषेत्यादौ चरितार्थं तयोरपि पूर्वं
प्रवृत्तगुणस्य पूर्वप्रवृत्तह्रस्वद्विर्वचने चीति रूपातिदेशेनापहारात् द्वित्वे कृते पुनः प्राप्तेगुणवृद्धी बाधित्वांतरंगत्वा
त्सवर्णदीर्घापत्तेः। नचेयर्त्तेरित्यादौ तच्चरितार्थं तावन्मात्रप्रयोजनकत्वे उरित्येव ब्रूयात् यणोरित्यनुवर्तते। इणो य
णितिसाहचर्यात् व्याख्यानाच्च। ऋधातोरेव ग्रहणं अर्तेरिवर्णस्येयङित्यर्थः। अभ्यासस्यानचीति अभ्यासस्यानै
रितिवा गुरुत्वान्नयुक्तं। नचएएओऔशब्देभ्य आरब्धाराद्धिवंते ओलिटी यङघर्थंतत्सूत्रमावश्यकं। तथाओण्णा

तोन्तर्भूतत्वादिच्छाकार्यज्ञानानिच्छुत्वोणकीयिषतीत्याद्यर्थमावश्यकमिति वाच्यं। चाष्टप्रथमान्तं किंकान्तस्य भाष्य
प्रामाण्येन तेषामनभिधानात्। अन्त्ये द्वितीयद्विर्वचनस्यैवसत्त्वेन तद्दुष्कंप्रयोगस्यैव दुर्लभत्वात्। एवं च संपूर्णस्य
सूत्रस्य ज्ञापकतायुक्ता। यद्यपि भाष्ये यदयमभ्यासस्य सवर्णादृत्यसवर्णग्रहणं करोतीति ग्रंथेनासवर्णग्रहणांशस्यै
व ज्ञापकता लभ्यते। तथापि नह्यंतरेण गुणवृद्धिअसवर्णपरोभ्यासोऽस्ति वनीतितदुपपादनग्रंथेन संपूर्णसूत्रस्यै
व ज्ञापकता लभ्यते। अग्रेपि नैतदस्ति ज्ञापकमन्यार्थमेतत्स्यादिस्मनेन सूत्रे सार्थक्यमेव दर्शितं। असवर्णग्रहणस्यै
व ज्ञापकत्वे तु तत्रावलर्यप्रदर्शनेनेन तत्सार्थक्यमेव दर्शितं स्यात्। न चाकृतपरिभाषयेयेषेत्यादौ सवर्णदीर्घप्राप्ति
यदि दीर्घो न स्यात्तर्हि गुणः स्यादिति संभावनायामसत्त्वेन परिभाषाप्रवृत्तेः सूपपादत्वाद्धितिकथं संपूर्णसूत्रस्य ज्ञाप
कतेति वाच्यं। तस्याः असत्त्वात्सत्त्वे वागतज्ञाष्यमाण्येन यत्रांतरंगकार्यप्रवृत्तियोग्यकालेऽन्तरमेव तन्निमित्तकवि
नाशकबहिरंगविधेः प्राप्तिस्तत्रैव तत्परिभाषाप्रवृत्तिस्वीकारात्॥ न चांतरंगत्वाद्दीर्घे इयायेत्यादौ पूर्वं तत्सेनाभ्या ३१

सत्वादिवर्णत्वाद्गुणस्यसवर्णेद्द्यपद्विधानेन सूत्रचरितार्थे न चाचिश्रुद्दित्यनेनसिद्धिः वृद्धिबधनार्थत्वादिति वाच्यं। अत्र
सासत्वासवर्णापदेनाभ्यासोत्तरखंडसंबंधिअसवर्णाचएवग्रहणात्। शास्त्रबाधकस्येवयापेक्षयापरिभाषाज्ञाप
कत्वस्यैवोचितत्वाच्चेत्याहुः। साचेयं धर्मिग्राहकमानादंगवाप्योयस्समानकार्यित्वमेव। यत्तु समाननिमित्तकत्वरूप
समानाश्रयत्वे एवेषेतितन्न। ज्ञापितेऽपि इयायेषेत्याद्यसिद्धेः सूत्रवैयर्थ्यस्य तदवस्थत्वाच्च। सोनद्द्यसत्रनुवक्ष्यमा
णरीत्याऽसत्वाः आनित्यत्वादप्रवृत्तौ गुणांतरंगत्वाद्गुणादेशः। न चैवमपीयायेत्यादौ वियङ्. दुर्लभस्तत्र केनव्येह
ष्यादेः स्थानिवत्वेनासवर्णत्वेति प्रतिषेधाद्दिति वाच्यं। सूत्रारंभसामर्थ्यादेवस्थानिवत्वाप्रवृत्तेः। तच्च सामान्यापे
क्षमभ्यासस्य कार्यं तदुत्तरखंडादेशस्य तत्कार्यप्रतिबंधकीभूतस्थानिवत्वं नेति। अतएवारतीमादेयशादेशस्यस्था
निवत्वादभ्यासस्यद्देलोपइतिदीर्घोदुर्लभइत्यपास्तं दीर्घविधौ तन्निषेधाच्च। अरिप्रिपादि सूत्रस्थानिवत्वेनेयउ
भवस्यैवतस्यस्थानिवत्वस्याभ्यासकार्यप्रतिबंधकत्वाभावात्। इयं चांगसंबंधिन्यांगएवस्वरितो वेति सूत्रे भाष्ये॥

प॰भा॰शे॰ तत्रहिकुमार्यैइत्यादौयण्णुत्तरमाडुक्तः।।इयंचानित्यासतुक्कुनिर्देशात्।अन्यथांशंगत्वाम्पूर्वंतुकःशादेशेतुकोऽप्राप्त्या

३२ तद्वैयर्थ्यंस्पष्टमेवेत्यन्यत्रविस्तरः।।५५।।नन्वेवंसेदुषइत्यादौक्क्सोरंतरंगत्वादिरितनःसंप्रसारणेपीरःश्रवणापत्ति

रितिचेदत्रकेचित्।अकृतव्यूहाःपाणिनीयाः।। ।।नकृतऊहोविशिष्टनिश्चयःशास्त्रप्रवृत्तिविषयोयैरित्यर्थः।भा

विनिमित्तविनाशेइत्यध्याहारः।बहिरंगेणांतरंगस्यनिमित्तविनाशेपश्चात्संभावितेंतरंगंनेतियावत्।अत्रचज्ञा

पकंसमर्थानांप्रथमाद्वेतिसूत्रेसमर्थानामितितद्धितस्थितिनादिभ्यःकृतदीर्घेभ्यःप्रत्ययोत्पत्त्यर्थं।अन्यथांतरंग

त्वाद्दीर्घेकृतेएवप्रत्ययप्राप्त्यातद्वैयर्थ्यंतास्पष्टैव।तत्रहिभाविन्यादिवृद्ध्याससवर्णदीर्घविनाशःस्पष्टएव।नचात्रैकादेश

प्रवृत्तिसमयेवृद्ध्यप्राप्त्यैकादेशेकृतेआदेशेकृतेःप्राप्तावपितन्निमित्तविनाशाभावइतिवाच्यं।तद्वारेवनिमित्तवि

सैसञ्जीवन नाशसत्त्वेनअक्षतेः।नचसौत्थितौबहिरंगतयासूत्रेऽसिद्धत्वान्नतन्निमित्तविनाशइतिवाच्यं।समर्थग्रहणेनेतद्धि

२ षयेतस्याअप्रवृत्तेरपिज्ञापनात्।यत्तुसमर्थग्रहणेनांतरंगपरिभाषायाअनित्यत्वमेवज्ञाप्यतइति।तन्न।असिद्धपरिभा ३२

षायासमकालप्राप्तबहिरंगस्यपूर्वंजातबहिरंगस्यवांतरंगेकर्तव्येऽसिद्धत्वंबोध्यते।।नतुजातेबहिरंगेतस्यतत्त्वंबोध्यतेमा

नाभावात्फलाभावाच्च।।एवंचसौत्थितादावेकादेशस्यपरिभाषासाध्यत्वाभावेनतदनित्यत्वज्ञापनासंभवात्।अंतरंगान

पिविधीनित्यादेरपिअस्यामेवांतर्भावः।एतन्मूलत्वेनोनिमित्तविनाशसंभवनापिनिमित्तं।अतएवगोमदंडीमादौहल्ङ्यादि

लोपोन।अन्यथाहल्ङ्यादिलोपकालेसामासिकलुकोऽप्राप्त्यातदुत्तरंचापहार्याभावात्प्राप्त्यालोपस्यैवापत्तेः।अस्तिचा

त्रापियदिलोपोनस्यात्तर्हिलुक्स्यादितिसंभावना।अह्नोपोनइतिसूत्रस्थतपरकरणंतुपरिभाषाऽनित्यत्वज्ञापनेनचरि

तार्थं।।तद्धिआनइत्यादौलोपवारणाय।अन्यथादीर्घाभावेलोपसंभावनयाएतत्परिभाषाबलाद्दीर्घप्राप्तौतद्वैयर्थ्यं

स्पष्टमेवेत्याहुः।।समर्थानामितिसूत्रेकैयटस्तुसमर्थवचनेनेयंपरिभाषाज्ञाप्यते।।अकृतव्यूहाःपाणिनीयाइति।।तेन

पपषइत्यादौअंतरंगात्वात्पूर्वंकृतोपीङागमोनिवर्ततइतिवदन्नकृतोव्यूहोविशिष्टस्तर्कोनिमित्तकारणनाशेपिका

र्यस्थितिरूपोयैरित्यर्थमभिप्रैति।।निमित्तापायेनैमित्तिकस्याप्यपायइतियावत्।।सौत्थितादिनिवृत्तौदीर्घनिवृत्तौ

प.भा.शे. सावुत्थितिर्माभूदिति समर्थानामिति" लोकन्यायसिद्धश्चायमर्थः। तथाहि लोके निमित्तं द्विविधं दृष्टं कार्यस्थितौ नियाम
३३ कं तदनियामकं च। आद्यं यथा न्यायनये अपेक्षाबुद्धिस्तन्नाशे द्वित्वनाशाभ्युपगमात्। वेदांतनये प्रारब्धस्य विक्षेपस्थितौ नि
यामकत्वं च प्रसिद्धमेव। द्वितीयं यथा। दंडादि तन्नाशेपि घटनाशादर्शनात्॥ शास्त्रे लक्ष्यानुरोधात् तमवस्थाभावि निमित्त
विनाशे पूर्वमनुत्पत्तौ तु न कश्चिन्नाशे नापि संप्रतिपन्नो दृष्टांतः समर्थानामित्यस्यापि लोकासिद्धार्थज्ञापनेन चारिता
र्थ्यसंभवे लोकासिद्धापूर्वतादृशार्थज्ञापकत्वे मानाभाव इति तदाशय इति। परे तु सेदुषः इत्यादौ पदावधिके अन्वाख्याने से
दुस् इति स्थिते नेड्वशि संप्रसारणयोः प्राप्तौ मातिपदविधित्वात् पूर्वं संप्रसारणे वसुऽद्वित्वाभावादिटः प्राप्तिरेव नेति तन्निषिद्धिरि
ति स्पष्टं समर्थानामिति सूत्रे कैयटे असिद्धवत्सूत्रे च कैयटे स्पष्टमेतत्। यद्यपि मातिपदविधित्वमनवकाशत्वे सत्येव बा
धकत्वे बीजं। तथापि पूर्वं प्रवृत्तौ सावकाशत्वेपि नियामकं भवत्येवेति तदाशयः॥ निरूपितं चैतद्धलः शब्देन्दुशेखरे॥
समर्थानामिति सूत्रस्य समर्थग्रहणं तु विपुणइत्यादावकृतसंधेः प्रत्ययदर्शनेन सर्वत्र तथाभ्रमवारणाय न्यायसिद्धा ३३

र्थानुवाद एव। ध्वनितं चेदं विप्रतिषेधसूत्रे भाष्ये। तत्र हि वैस्प्रमाणिरित्यंतरंगपरिभाषोदाहरणमुक्तं। किं च विभज्यान्वा
ख्याने सुत् स्थित अस इति स्थिते वाणीदांगं बलीय इति प्राप्तवृद्धिवारणाय समर्थग्रहणमिति नैव सूत्रे कैयटे स्पष्टं। अत ए
वासिद्धवत्सूत्रे वसुसंप्रसारणमाजिघौ सिद्धं वक्तव्यं। पपुषः इत्यादौ वसोः संप्रसारणे कृते आतो लोपो यथा स्यादिति भा
ष्ये उक्तं। पदस्य विभज्यान्वाख्याने पूर्वोक्तकैयटरीत्या पूर्वं संप्रसारणे इटो प्राप्त्या वाऽत्रिमित्तक एव आतो लोप इति तदाशयः
ऽअन्यथांतरंगत्वादिटि तन्निमित्तक एव आतो लोप इति तदसंगतिः। अत एव श्वो प्रसंगस्य प्रतिबेध इति वचनं वार्त्तिककृता
रब्धं ऽभाष्यकृता चन प्रत्याख्यातं प्रसंगमंतरंगं अस्यां परिभाषायां सत्यां तु तद्वैयर्थ्यं स्पष्टमेव। अत एव श्चो रिति सूत्रे ऽवश्य
मानत्तुगभावार्थो यत्नकर्तव्य अंतरंगत्वाद्धि तुक् प्राप्नोतीति भाष्ये उक्तं। एतत्सत्त्वे तु तुको ऽप्राप्त्या यत्नावश्यकत्वकथनमसंगु
तमिति स्पष्टमेव। न चैतदनित्यत्वज्ञापनार्थमतादिति तदाशयः। अवश्यमत्र त्यक्षरस्य भंगापत्तेः। किं चानयैव प्रत्यययोत्तरपद
योश्चादो जग्धिर्ल्यप्ति किति नयोश्चारितार्थ्येन तज्ज्ञापकत्ववर्णनं लुकुल्पोरंतरंगबाधकता भाष्योक्ता भज्येत। किं चैषा भाष्येन द

प॰भा॰शे॰ श्यते। तदुक्तमसिद्धवत्सूत्रे कैयटेनानिमित्तापाये नैमित्तिकस्याप्यपाय इति परिभाषा भाष्यकृता नाश्रयणादिति। पदसंस्कारपक्षे
३४ हे रिरित्यादौ विसर्गादौ कृते ततो गच्छतीत्यादौ संबंधे हरिः गच्छतीत्याद्यसाधु। तद्विषये पदसंस्कारपक्षानाश्रयणं वेति दि
क्॥ ६१॥ ॥अंतरंगादप्यपवादो बलवान्॥ ॥तत्रापवादपदार्थमाह॥ ।येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको
भवति॥ ॥प्राप्ते इति भावे क्तः॥ येन नाप्राप्ते इत्यस्य यत्कर्तृकावश्यप्राप्ताविति अर्थः। नञ्द्वयस्य प्रकृतार्थदार्ढ्यबोधकत्वात्॥
एवं च विशेषशास्त्रोद्देश्यविशेषधर्मावच्छिन्नवृत्तिसामान्यधर्मावच्छिन्नोद्देश्यकशास्त्रस्य विशेषशास्त्रेण बाधः। तदप्रा
प्तियोग्येऽचारितार्थ्यं हि एतस्य बाधकत्वबीजं। अत एव धातादय इति सूत्रे गोपायिष्यतीत्यादौ आयादीन्बाधित्वा परत्वा
त्स्यादयः प्राप्नुवंतीत्याशंक्य ऽनवकाशा आयादयः गोपायतीत्यादावपि शप्यादिः प्राप्नोति। नयसातिशयमतिवान्
विशेषः। अन्यदिदमुच्यते॥ नास्ति विशेष इति यदुक्तं मायादीनां स्यादिभिरप्राप्तावकाश इति स नास्त्यवकाश इति भाष्ये उक्तं॥
एवमत्रतमस्तु तरं चारितार्थ्येऽपि तदप्राप्तावकाशो नास्तीति सममेव॥ किंचानेन न्यायेन तत्सूत्रे वृत्तुत्तरं चारितार्थ्येऽपि बाध ३४

बोधनं॥ अन्यथानवकाशत्वेनैव बाधे सिद्धे तत्कथनवैयर्थ्यापत्तेश्च॥ तक्रकौण्डिन्यन्यायप्रदर्शनवैयर्थ्यापत्तेश्च॥ यथा
प्रथमद्विर्वचनस्य तदुत्तरं सावकाशेनापि द्वितीयद्विर्वचनेन बाधः॥ यथा वादेरपेक्ष्य ह्रस्वाचारितार्थ्ये नादेः परस्येत्यस्यने
नालोन्त्यस्येत्यस्य बाधः॥ तदुक्तं मिदचोन्त्यात्सूत्रे भाष्ये सत्यपि संभवे बाधनं भवतीति॥ अन्यथा ब्राह्मणेभ्यो दधि दीय
तां तक्रं कौण्डिन्यायेत्यत्र तक्रदानेन दधिदानस्य बाधो न स्यात्। तद्दानोत्तरं तत्पूर्वं वा तद्दानस्य चारितार्थ्यसंभवात्॥ अत
एवाविषयभेदेऽप्यपवादत्वं॥ अत एव अचिरादेशेन नुटोऽप्यपवादत्वमाशंक्य न तिसृतिज्ञापकेन समाहितं तृज्वत्सूत्रे
भाष्ये॥ तेन निषेधेन विषयभेदेऽपवादत्वाभाव एव बोध्यत इति कश्चित्तन्न॥ विन्मतोर्लुक्काटिलोपमात्रस्य बाधापत्ते
ः॥ यत्तु दयतेर्दिगि लिटीति सूत्रे द्वित्वोत्तरं दिग्यादेशस्य चारितार्थ्यं कैयटेनोक्तं तन्न॥ क्व ध्वनितं च तेनापि तस्य तथात
दुत्तरग्रन्थेन। असंभवबाधकत्वे विरोधस्य तद्बीजत्वादिति वार्त्तिकमतं तु भाष्यकृता दूषितत्वान्न लक्ष्यसिद्ध्युपयोगी॥
तत्र तक्रकौण्डिन्यायोऽपि तदप्राप्तियोग्येऽचारितार्थ्यं विषयो विधेयो विषय एवेति तद्धितेष्वचामादेर्धातोरेकाच इत्यादि

प॰भा॰शे॰ सूत्रेषु भाष्ये स्पष्टं ॥ क्वचित्तु सर्वथानवकाशत्वादेव बाधकत्वं ॥ यथा ङेरामो याडादिबाधकत्वं नद्याडादिषूक्तेषु ङेरा-
३५ मुन्नाप्नोतीति निर्दिश्यमानस्य विधानात् ॥ तत्र स्वस्य पूर्वं प्रवृत्तिरिष्यते वा तेषां बाधः ॥ तत्र बाधके प्रवृत्ते यद्युत्सर्गप्रवृत्तिरस्ति
तदा भवत्येव सः ॥ यथा तत्रैव याडादयः ॥ अत्रापि नानुन ॥ यथा पचेपुरित्यादौ दीर्घबाधके निरवकाशउपादेशे दीर्घाभा-
वः ॥ तदेतन्मह्यते ॥ ॥ क्वचिदपवादविषयेप्युत्सर्गोभिनिविशते ॥ अपवादशब्दोत्र बाधकपरः ॥ तदुक्तं गुणोपङः छि-
कोरित्यत्र भाष्ये ॥ अभ्यासविकारेष्वपवादा उत्सर्गान्न बाधन्ते ॥ अजीगणत् ॥ अत्र गणेरीत्वमपवादत्वात् हलादिःशे-
षं न बाधते ॥ न गणेरीत्वं अपदत्वात् हलादिःशेषं बाधते ॥ किंतर्हि अनवकाशत्वादिति ग्रंथेन ॥ गणरूपाभ्यासांत्यण-
स्य त्वमित्यर्थे हलादिःशेषेण तन्निवृत्तौ न दनवकाशं ॥ ईत्वे तु कृते तस्याप्राप्तिरंत्यहलोभावात् ॥ अभ्यासविकारेषु
बाध्यबाधकभावाभावेन च साधितं ॥ तस्मिंश्च सति लोपेकृते सामर्थ्यात् क्षिपस्यां स्यस्येन्यत्वमिति न दोषः ॥ न च
येन नाप्राप्तिन्यायेनापवादत्वमप्यस्तु उक्तं ॥ तस्याचरितार्थविषयतायाउक्तत्वात् ॥ इको झलिति सूत्रे भाष्ये ध्वनितमे ३५

तत् ॥ तत्र हि अस्तु नेत्रिति दीर्घेण गुणोत्तरं फलाभावेनानवकाशत्वाद्गुणो बाधितेदीर्घोत्तरं गुणः स्यात् ॥ दीर्घविधानं तु
मीनातेर्दीर्घकृते मानि मीमेत्यत्र मीग्रहणे नग्रहणेर्थवत् ॥ अत्र पश्चात्प्राप्तगुणबाधनार्थमिको झलिति कित्त्वमित्युक्तं
॥ अन्यथापवादत्वेन बाधे तद्विषयेउत्सर्गाप्रवृत्तेर्भाष्यस्य सूत्रस्य चासंगतिरिति स्पष्टमेव ॥ यत्तु कांचनीत्यादौ अपवा-
दमयट्विषयेप्यण् भवति क्वचिदपवादविषयेपीति न्यायादिति तन्न ॥ अण्कर्मणि चेति सूत्रस्य भाष्यविरोधात् ॥
तत्र ह्यणः पुनर्वचनमपवादविषये निवृत्त्यर्थं गोदायो व्रजतीत्येतत्साध्युक्तं ॥ कांचनीत्यादौ कांचनेन निर्मितेत्यर्थे श्रौ-
षिकोप्यबाध्यः ॥ अत्रेदं बोध्यं ॥ येन नाप्राप्ते इत्यत्र येन त्यस्य यदि स्वेतरेणोत्पर्स्तदा स्वविषये स्वेतरत्र यद्यत्प्राप्नो-
ति तद्बाध्यं ॥ विध्यंतराप्राप्तविषयाभावात् ॥ इयमेव हि बाध्यसामान्यचिंतेति व्यवह्रियते ॥ अनवकाशत्वेन बाधेप्ये-
षा वक्तुं शक्या यद्युदाहरणमस्ति ॥ विनिगमनाविरहात् ॥ यदि तु येनेत्यस्य येन लक्षणेनेत्यर्थो येन कार्येणेत्यर्थो वा

३ ननु कांचनीत्यादौ शैषिकाणं बाधित्वा वृद्धाच्छस्यादिति चेन्न ॥ राष्ट्रावारेत्यादिसूत्रैः प्रकृतिविशेषविहितानां घादिघुञ्लंतानां वसभावर्जा ३
३ तादयोऽर्थाः समर्थविभक्तयश्च वक्ष्यंत इति मूल एवोक्तत्वेन प्रकृतिविशेषाद्विहितानामेव तेर्बाधइत्याशयात् ॥ ३

प॰भा॰शे॰ तदा बाध्यविशेषचिंता॥ अनवकाशत्वेन बाधेप्येतद्बाधेन सार्थक्यस्य पुनस्तद्बाधेनैवं विशेषचिंतासंभवो यद्युदाहरणमस्ति
३६ ॥ तत्र येन कार्येणेत्यर्थे परस्परत्वावच्छिन्ने कार्ये प्राप्ते आरभ्यमाणायाहृद्धेस्तद्बाधकत्वेन निर्णीते किं शास्त्रविशि॰त
स्येत्येवं तद्विशेषचिंतायामाह॥ पुरस्तादपवादा अनंतरान्विधीन्बाधंते॥ नोत्तरान्॥ अवश्यं स्वपरस्मिन्बाधनीये
प्रथमोपस्थितानंतरबाधेन चारितार्थ्ये पश्चादुपस्थितस्य बाधे मानाभावः॥ आकांक्षानिवृत्तेः निःप्रतिषेध
शास्त्रबाधे मानाभावाच्चेति तस्य बीजं॥ ॥नासिकोदरोष्ठजंघादंतेत्यस्य सोप्तांगशेङीषु निषेधत्वावच्छिन्नबाधक
त्वेन निर्णीते किं विहितस्येत्याकांक्षायामाह॥ ॥मध्येपवादाः पूर्वान्विधीन्बाधंते नोत्तरान्॥ तेनोष्ठादिषु पंचसु अ
संयोगोपधादिति निषेध एव बाध्यते न तु सह नञ्विद्यमानलक्षणा इति नासिकोदरेत्यत्र भाष्ये स्पष्टं॥ पूर्वोपस्थि
तबाधेन नैराकांक्ष्यमस्य बीजं॥ ननु वा छंदसीत्यनेन सेर्ह्यपिच्चेत्यनंतरस्यापित्वस्येव हेरपि विकल्पः स्यात्तथा
नेटीति निषेधोऽनंतरहलंतलक्षणाया इव सिचि वृद्धिर्मृजिवृध्योरपि स्यात्॥ अत उक्तन्यायमूलकमेवाह॥ ३६

अनंतरस्य विधिर्वा भवति प्रतिषेधो वेति॥ ॥अत एव संख्याव्ययादेरिति ङीप्ग्रहणं चरितार्थं॥ तद्ध्यनंतरस्य ङीषो वि
धानाय॥ नाञ्चीति सूत्रे दीर्घग्रहणं चरितार्थं॥ तद्धि अनंतरस्यानुदात्तोपदेशेत्यस्यैव निषेधाभावाय॥ क्वचित्त्वरितत्व
प्रतिज्ञाविज्ञानात्सामर्थ्येन वा बाध्यते मध्येपवादादिन्यायापेक्षया अनंतरस्येति न्यायः प्रबल इत्यषाम्प इति सूत्रे कैयट
॥ प्रत्यासत्तिमूलकोयं लक्ष्यानुरोधाच्च व्यवस्थेमपि पक्षांतरं॥ तत्र तत्र क्वचित्त्वरितत्वप्रतिज्ञानात्सामर्थ्येन वा बा
ध्यतेऽयं न्यायः॥ यथा टिड्ढेति सूत्रेण टापा व्यवहितस्यापि ङीपो विधिः॥ न षट्स्वस्रादिना द्वयोरपि टाप्ङीपोः प्रतिषेध
॥ इयं च शिवसर्वनामस्थानमित्यादौ भाष्ये स्पष्टेत्यन्यत्र विस्तरः॥ ननु दधातीत्यादावंतरंगत्वाद्दंतादेशेऽल्विधौ
स्थानिवत्त्वाभावाद्धादेशो न स्यादिति तद्वैयर्थ्यापत्तिरत आह॥ ॥पूर्वं ह्यपवादा अभिनिविशंते पश्चादुत्सर्गाः॥
॥ लक्षणैकचक्षुष्को ह्यपवादविषयं पर्यालोच्य तद्विषयत्वाभावनिश्चये उत्सर्गेण तल्लक्ष्यं संस्करोति॥ अत
या विकल्पापत्तिरित्यर्थः॥ अभिनिविशंते॥ लक्ष्य बुध्यारूढा भवंतीत्यर्थः॥ अपवादो यद्यन्यत्र चरितार्थस्तर्हि न्याय

स्यतुनात्रप्राप्तिरित्यादेशाप्राप्तिविषयेचारितार्थ्याभावात्॥ लक्ष्यैकचक्षुष्कस्तुतच्छास्त्रपर्यालोचनंविनाप्यपवा
दविषयंपरित्यज्योत्सर्गेणलक्ष्यंसंस्करोति॥ तस्यापिशास्त्रप्रक्रियास्मरणपूर्वकप्रयोगएवधर्मोत्पत्तेस्तदाह॥
॥प्रकल्प्यचापवादविषयंततउत्सर्गोऽभिनिविशते॥ ॥ततइत्यस्यापवादशास्त्रपर्यालोचनात्प्रागपीत्यर्थः
॥प्रकल्प्येत्यस्यपरित्यज्येत्यर्थः॥ अतएवप्रातिपदिकार्थसूत्रेभाष्येइदंद्वयमप्युक्त्वानकदाचित्तावदुत्सर्गोभव
त्यपवादंतावत्प्रतीक्षतेइत्यर्थकमुक्तं॥ एतन्मूलकमेवनवीनाःपठंति॥ ॥उपजानिष्यमाणनिमित्तोप्यप
वादउपसंजातनिमित्तमप्युत्सर्गंबाधतेइति॥ ॥यत्तुभस्त्रसंज्ञासूत्रेकैयटेनप्रकल्प्यचेतिप्रतीकमुपादाय
यथानसंप्रसारणेइतिपरस्ययणःपूर्वंसंप्रसारणंपूर्वस्यतुतन्निमित्तःप्रतिषेधइत्युक्तं॥ तत्तुनतउत्सर्गइत्या
द्यक्षरानुगुणं॥ यत्तुअपवादवाक्यार्थंविनानोत्सर्गवाक्यार्थइतितदर्थइतितन्न॥ अभिनिविशतेअपवाद
विषयमित्यादिपदस्वारस्यभंगापत्तेः॥ पदजन्यपदार्थोपस्थितौवाक्यार्थबोधाभावेकारणाभावाच्च॥ यत्रत्व ३१

पवादोनिषिद्धस्तत्रापवादविषयेप्युत्सर्गःप्रवर्ततएव॥ यथावृक्षावित्यत्रनादिचीतिपूर्वसवर्णदीर्घनिषेधात्अ
प्रवर्त्तमानस्यवृद्धिबाधकत्वाभावात्वृद्धिःप्रवर्तते॥ अतएवतौसदित्यादिसंगच्छते॥ अतएवनिर्दिष्टाद्भूतावसरन्याय
स्यात्रशास्त्रेनाश्रयणं॥ ध्वनितंचेदंइकोगुणेतिसूत्रेभाष्येइतिभाष्यप्रदीपोद्योतेनिरूपितं॥ अत्रदेवदत्तस्यहंतरि
हतेदेवदत्तस्योन्मज्जनंनेतिन्यायस्यविषयएवनास्तिहतेदेवदत्तेउन्मज्जनंन॥ देवदत्तहननोद्यतस्यहननेतुभवत्येवो
न्मज्जनं॥ प्रकृतेपिनपूर्वसवर्णदीर्घेणवृद्धेर्हननं॥ किंतुहननोद्यमसजातीयप्रसक्तिमात्रंप्रसक्तस्यैवनिषेधात्॥
प्रतिपदोक्तत्वमपिनिरवकाशत्वेसत्येवबाधकत्वेप्रयोजकं॥ स्पष्टंचेदंशेषाद्विभाषेतिसूत्रेभाष्ये॥ तत्रहिशेषग्रहणं
अनर्थकंयेप्रतिपदंविधीयंतेतेबाधकाभविष्यंतीत्याशंक्यानवकाशाहिविधयोबाधकाभवंतिसमासांताश्च
कबभावेसावकाशाइत्युक्तं॥ क्वचिदनवकाशत्वाभावेपिपरनित्यादिसमवधानेशीघ्रोपस्थितिकत्वेनपूर्वप्रवृ
त्तिप्रयोजकंबलवत्त्वंप्रतिपदविधित्वेनापि॥ परनित्यांतरंगप्रतिपदविधयोविरोधसंनिपातेतेषांमिथःप्रसंगे

प.भा.शे. परबलीयस्त्वमिति प्रसयोत्तरपदयोश्चेति सूत्रे कैयटेन पाठात्॥ अत एव वरमेरित्यादौ प्रातिपदोक्तत्वात्सर्वमेत्वे आ
३८ कारप्रश्लेषादुक्तादिलोपेन प्राप्नोतीत्याशंक्य गाङ्कुटादिति लोपेन समाहितं॥ नन्वयजे इंद्रं इत्यादौ अंतरंग
स्यापि गुणस्यापवादेन सवर्णदीर्घेण बाधः स्यादत आह॥ : : ॥ अपवादो यद्यन्यत्र चरितार्थस्तर्ह्यन्तरंगे
ण बाध्यते॥ निरवकाशत्वरूपस्य बाधकत्वबीजस्याभावात्॥ एवं च प्रकृतेंतरंगेण गुणेन सवर्णदीर्घः समाना
श्रये चरितार्थो यण्गुणयोरपवादोपि बाध्यते॥ पूर्वोपस्थितनिमित्तकत्वरूपांतरंगविषये इदं॥ पत्वागमादेश
योर्न बाध्यबाधकभावो भिन्नफलत्वात्॥ अत एव ब्रह्मणोभ्यो दधिदीयमानं कंबलः कौडिन्यायेत्यादौ कं वले
न न दधिदान बाध इति छंद्योरिति सूत्रे कैयटस्तन्न॥ अपवादो नुग्दीर्घत्वस्येति दीर्घो किं तश्चेति सूत्रस्थभाष्यविरो
धात्॥ नन्वजीगणदित्यादौ गणोरीत्वं निरवकाशत्वाद्धलादिःशेषं बाधेत तत्राह॥ अभ्यासविकारेषु बाध्यबाध
कभावो नास्ति॥ : : ॥ दीर्घो किं तइत्यकितग्रहणमस्याः ज्ञापकं॥ अन्यथायंयम्यनेइत्यत्र तु किंत्वेतेः नजंतत्वा ३८

दीर्घप्राप्तौ तद्वैयर्थ्यं स्पष्टमेव इयं च परांतरंगादिबाधकानामप्यबाधकत्वबोधिका॥ तेनाचीकरत मीमांसत इ
त्यादिसिद्धं॥ आद्ये सन्वद्भावस्य परत्वाद्दीर्घेण बाधः प्राप्नोति॥ अंत्ये मान्बधेति दीर्घेणांतरंगत्वादित्वस्य बाधः
प्राप्तः॥ यत्तु यत्रैकैकग्रहणं सुरमपि सर्वेषां प्रवृत्तिस्तत्रैवेत्यप्रवृत्तिरित्यत एकेति सूत्रे कैयटस्तन्न॥ नुकि कृते दीर्घ
प्राप्त्या धर्मिग्राहकमानविरोधात्॥ मान्बधादीनां दीर्घकृते इत्वाप्राप्त्या गुणोयङ्लुकोरिति सूत्रभाष्योक्तनदुदा
हरणासंगतेश्चेत्यन्यत्र विस्तरः॥ ननु ताच्छीलादिक तृन्विषये ण्वुलपि स्यात्॥ न च तृन्नपवादः असरूपोपवाद
स्य विकल्पेन बाधकत्वादत आह॥ : : ॥ ताच्छीलिकेषु वासरूपविधिर्नास्ति॥ : : ॥ ण्वुलि सिद्धे निंदहिंसादिसू
त्रेणैकाजयोर्वुञ्विधानमत्र ज्ञापकं॥ तत्र ण्वुल्वुञोः स्वरे विशेषाभावात्॥ ताच्छीलिकेष्विति विषयसप्तमी॥
तेन ताच्छालिकैरताच्छीलिकेश्च वासरूपविधिर्नेति बोध्यं॥ नन्वेवं कंशाकंपने सादेर्न सिद्धिः॥ नमिकंपीति रे
णानुदात्तेतश्च हलादेरिति युचो बाधादिति चेन्न॥ सुददीपदीक्षश्चेसनेन दीपेर्युज्निषेधेनोक्तार्थस्यानिस

त्वात्॥ नन्वेवं हसितं छात्रस्य हसनमित्यादौ घञ् इच्छति भोक्तुं इत्यत्र लिङ्लोटौ ईषत्पानः सोमो भवतेत्यत्र खलप्रा
प्नोतीत्यत आह॥ ॥क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्ति॥ ॥इदं च वासरूपविधेरनित्यत्वात्सिद्धं॥ त
दनित्यत्वे ज्ञापकं चार्हे कृत्यतृचश्चेति॥ तत्र चकारसमुच्चितलिङा कृत्यतृचोर्बाधा मा भूदिति स्पष्टं जनरूपा॰
क्रियत इत्यन्यत्र विस्तरः॥ वासरूपसूत्रे भाष्ये एषा स्पष्टा॥ ननु श्वः पक्तेत्यत्र वासरूपविधिना लुङपि प्राप्नोति कृ
ते आदेशे वैरूप्यादत आह॥ ॥आदेशेषु वासरूपविधिर्नास्ति॥ आदेशा हि तद्वैरूप्यवत्सु लकारेषु स नास्ती
त्यर्थः॥ अत्र हशश्वतोर्लङ् चेति लङ्विधानं ज्ञापकं॥ अन्यथा परोक्षे लिटा लङः समावेशोऽसारूप्यात्सिद्धे
इति किं लङ्विधानेन॥ शत्रादिभिस्तिङां समावेशार्थं शतृविधायके विभाषाग्रहणानुवृत्तिः लिटः कानज्वेत्यत्र
वाग्रहणं च कृतं॥ तज्ज्ञापयति वासरूपसूत्रेऽपवाद आदेशानाक्रांतः प्रत्यय एव गृह्यत इति कैयटादौ ध्व
नितं॥ तत्फलं तु सदादिभ्योऽन्यत्र सामान्ये लिटः क्वसुरेव॥ ननु पक्षे तिङिति बोध्यं॥ ननु ङमो ह्रस्वादित्यादौ ङमः पर ३९

स्याचो विपरतो ङमुडिति चेति संदेहः स्यादत आह॥ ॥उभयनिर्देशे पंचमीनिर्देशो बलीयान्॥ ॥अचीति सप्तमी
निर्देशस्य मय उञ इत्युत्तरत्र चारितार्थ्यात्पंचमीनिर्देशोऽनवकाश इति तस्मादित्युत्तरस्येत्यस्य प्रवृत्तिः॥ यत्र तु ङः सि धुडि
त्यादावुभयोरप्यचारितार्थ्यं तत्र तस्मिन्निति सूत्रापेक्षया तस्मादित्युत्तरस्येत्यस्य परत्वात्तेनैव व्यवस्था॥ ॥एवमुभ
योश्चारितार्थ्येऽपि॥ यथा आमि सर्वनाम्नः सुडित्यादौ तत्रामीति सप्तमी त्रेस्त्रय इत्यत्र कृतार्था॥ आदिति पंचमी आज्ज
सेरसुगित्यत्र चरितार्थेति॥ स्पष्टं तस्मिन्निति सूत्रे भाष्ये कैयटे च॥ नन्वतः कृकमीति सत्वं अयस्कुंभी इत्यत्र न स्यात्
॥कुंभशब्दस्योपादानादत आह॥ ॥प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणं॥ ॥सामान्यरूपेण विशेषरूपेण
वा प्रातिपदिकबोधकशब्दग्रहणे सति लिंगबोधकप्रत्ययविशिष्टस्यापि तेन ग्रहणं बोध्यमपि न केवलस्यापीत्यर्थः
॥अस्याश्च ज्ञापकं समानाधिकरणाधिकारस्थे कुमारः श्रमणादिभिरिति सूत्रे स्त्रीलिंगश्रमणादिपाठः॥ स्त्री
प्रत्ययविशिष्टश्रमणादिभिश्च कुमारीशब्दस्यैव सामानाधिकरण्यं न कुमारशब्दस्येति तज्ज्ञापकं॥ ॥॥

१ नेनद्विषतीतपद्धतिन भवति अतिसखीरित्यादौ समासांतो न मद्रुतीप्रियस्त्यत्रान्मद्गतइत्यालं नदाक्षिशब्दादितो मनुष्यजातेरितिङी १
विजिन्निस्यादिनि संभिस्याधुदात्तत्वं न आर्यब्राह्मणी आर्यकुमारी तत्र आर्यो ब्राह्मणकुमारयोरिति सूत्रेन नपूर्वपदप्रकृतिस्वरत्वे बहोर्नञ्वदुत्तरपद १
ननबहुगोमज्जो स्त्रसमासांतोदात्तत्वेन॥ १

इयं च द्विषत्स्वरयोरित्याद्युपपदविधौ समासांतविधौ महदात्वे ञ्नित्स्वरविधौ राजस्वरे ब्राह्मणकुमारयोर्बहोर्न
ञ्वदुत्तरपदभूम्नि इत्यादौ समाससंघातग्रहणेषु च न प्रवर्तते इति ज्ञाप्य सूत्रे भाष्ये स्पष्टं॥ विभक्तिनिमित्तकका
र्ये चनेत्यपि तत्रैव॥ तत्र समासांतविधौ अवयवग्रहण एव न॥ समाससंघातग्रहणे तु प्रवर्तत एव॥ स्वरविधावे
व समाससंघातग्रहणे तत्र दोषोक्तेः॥ बहुव्रीहेरूधस इति सूत्रस्थभाष्याच्च॥ एतावत्त्वेवानित्यत्वादप्रवृत्तिर्दोषाः
खल्वपि साकल्येन परिगणिता इति भाष्योक्तेः॥ नन्वेवं बहुव्रीहेरूधसो ङीषिति सूत्रस्थभाष्यासंगतिः॥ तत्र हि
कुंडोध्नीत्यत्र नद्यतश्चेति कबापादितो नद्यंतबहुव्रीहेरित्यर्थात्॥ नद्यंतस्य बहुव्रीहित्वाभावात्तदसंगतिः॥ नद्यंता
नाप्यः समासइत्यर्थेन परिहृतं॥ नद्यंतप्रकृतकस्तु बंतोत्तरपदकः समासइतीति चेन्न॥ अनया परिभाषया स्त्रीप्रत्य
यसमभिव्याहारे तद्धिते तदंतानां प्रातिपदिकत्वतत्प्रयुक्तधर्माणां विशिष्टेऽपि पर्याप्तत्वमतिदिश्यत इति आशयात्॥ ४०

तत्र हि स्त्रत्याश्चत्येपद्रत्यत्रोदात्तयणो हल्पूर्वादित्यस्य न गोश्वन्निति निषेधाशंकया विभक्तावितिपरिभाषया तदभावोक्तेः॥ एतद्भाष्यादेव विभक्तिनिमित्तएवेतिनाग्र
ह॰॥१२

ननु एवं यूनः पश्येत्यत्र युवती पश्येत्यत्रापि श्वयुवेति संप्रसारणं स्यादित्यत आह॥ ॥विभक्तौ लिंगविशिष्टाग्रहणं॥ ॥
स्पष्टा चेयं युवोरनाकावित्यत्र भाष्ये॥ घटघटीग्रहणात् लिंगविशिष्टपरिभाषाया अनित्यत्वात्तन्नलैषादृत्यने॥
ननु तस्यापत्यमित्येकवचनेन न नपुंसकाभ्यां निर्देशात् द्व्येयोर्गार्ग्याविष्याद्ययुक्तमत आह॥ सूत्रे लिंगवचनमतंत्रं॥
॥अर्धं नपुंसकमिति नपुंसकग्रहणमस्या ज्ञापकं॥ नित्यनपुंसकत्वार्थं तु न तदित्यन्यत्र निरूपितं॥ धान्यपला
लन्यायेन नांतरीयकतया तयोरुपादानमिति तस्यापत्यमिति सूत्रे भाष्ये स्पष्टा॥ अत एव आकडारसूत्रे एकेति
चरितार्थमित्यन्यत्र विस्तरः॥ ननु भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः इति विधीयमानः क्यङ् क्वचिदब्राह्मणा भवंतीत
त्रापि स्यादत आह॥ ॥नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः॥ नञ्युक्तं इवयुक्तं च यत्किंचिद्दृश्यते॥ त
त्र तस्माद्भिन्ने तत्सदृशेऽधिकरणे द्रव्ये कार्यं विज्ञायते हि यतस्तथार्थगतिरस्ति॥ न ह्यब्राह्मणमानयेत्युक्ते लोष्ट
मानीय कृती भवती॥ अतश्च्व्यंतभिन्ने च्व्यंतसदृशे भूततद्भावविषये क्यङिति नोक्तदोषः॥ ॥ओषधेश्चविभक्ता

वत्प्रथमायामित्यादौ विभक्तिग्रहणं ह्येतन्न्यायसिद्धार्थानुवाद एवेति बोध्यं॥ तेन विभक्तावित्याद्यस्या अनित्यत्वे ज्ञाप
कमिति वदंतः परास्ताः॥ अनित्यत्वे भाष्यसंमतफलाभावात्॥ अत एव अकर्तरि चेति सूत्रे कारकग्रहणं प्रत्याख्या
नमिति बोध्यं॥ स्पष्टा चेयं म्नशादिभ्य इति सूत्रे भाष्ये॥ अत्रान्यसदृशेऽनुक्त्या सादृश्यस्य भेदाघटितत्वं सूच्यते॥ नि
रूपितं चैतन्मंजूषायां॥ ननु व्याघ्रीकच्छप्यौ इत्यादौ सुबंतेन समासान्ततोऽप्यन्तरंगत्वाद्दापि अदंतत्वाभावाज्जातिल
क्षणो ङीष् न स्यादत आह॥ ॥गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः॥ ॥उपपदमिति
सूत्रेऽतिङ्ग्रहणेन कुगतीप्रादय इत्यत्र तदपकर्षणेनातिङंतश्च समास इत्यर्थात्तयोः सूत्रयोः सुप्सुपेत्यस्य निवृत्तेः कादेश
मनुमाकारकांशे चासिद्धेयं॥ तेनाश्वक्रीतीति सिद्धं॥ अन्यथा पूर्वं टापि अदंतत्वाभावात्क्रीतात्करणेति ङीष्
न स्यात्॥ अस्या अनित्यत्वात्क्वचित्सुबुत्पत्त्यनंतरमपि समासः॥ यथा साहितस्य धनक्रीतेति॥ अन्ये तु अनित्यत्वेन ४१
मानं तन्नाजादित्वाद्दाबित्याहुः॥ अत एव कुंभकार इत्यत्र षष्ठीसमासोऽपि सुबुत्पत्तेः पूर्वमेव॥ षष्ठीसमासाभावे चो

पपदसमासः कृत एवैकार्थीभाव इति न तत्र वाक्यमित्युपपदमिति सूत्रे भाष्ये स्पष्टं॥ तत्राह षष्ठीसमासादुपप
दसमासो विप्रतिषेधेनेति वार्तिकं॥ अथवा विभाषा षष्ठीसमासः॥ यदा न षष्ठीसमासस्तदोपपदसमास इति
तत्प्रत्याख्यानं च॥ यद्यप्युपपदसमासस्यांतरंगाभिप्रायकं न वा षष्ठीसमासाभावादुपपदसमास इति वार्तिक
कृतोक्तं तथापि तदुभयप्रत्याख्यानपरमथ वेत्यादिभाष्यं॥ परिभाषायां सामान्यतः कारकोपादानेन कार
कविभक्त्यंतेन कृद्भिः समासमात्रस्य सुबुत्पत्तेः पूर्वमेव लाभात्॥ एतेन एषा कारकतद्विशेषोपादानेनैवे
ति परास्तं॥ अस्या विध्येकवाक्यताभावेन विप्रतिषेधादिशास्त्रवत्कार्यव्यवस्थापकत्वेनोपादानेनैव
सर्वलाभाच्च॥ ननु उगिदचामित्यत्र धातोश्चेदुगित्कार्यं तर्ह्यंचतेरेवेति नियमेनाधातोरेव नुमिति सिद्धे धातु
ग्रहणमनर्थकमत आह॥ ॥सांप्रतिकाभावे भूतपूर्वगतिः॥ ॥तद्वचनसामर्थ्यान्न्यायसिद्धेयं॥ तत्सामर्थ्याद्धा
तुपूर्वस्यापीत्यर्थे नि गोमत्यतेः क्विपि गोमानित्यादौ नुम् सिद्धः॥ नामीत्यादिसूत्रे भाष्ये स्पष्टा॥ ॥बहुव्रीहौ तद्गु

प॰भा॰शे॰ णासंविज्ञानमपि॥ ॥अपिनाऽतद्गुणसंविज्ञानं॥ तेषां गुणानां अवयवपदार्थानां संविज्ञानं विशेष्यान्वयिना
४२ न्वयित्वमिति तदर्थः॥ यत्र समवायसंबंधेन संबंधी अन्यपदार्थस्तत्र प्रायस्तद्गुणसंज्ञानं॥ अन्यत्र प्रायोऽतत्॥
लंबकर्णश्चित्रगूदाहरणे सर्वादीनि जश्शिस्यादय इति चोदाहरणे सर्वनामसंज्ञासूत्रे भाष्ये एषा स्पष्टा॥ ८०॥
ननु वदः सुपि क्यप्चेति चेनानुकृष्टस्य यतो भुवो भावेऽत्यत्राप्यनुवृत्तिः स्यादत आह॥ ॥चानुकृष्टं नोत्तरत्र
॥ ॥णमुल्यनुवर्त्तमाने ऽव्यये यथाभिप्रेतेति पुनर्णमुल्ग्रहणमस्या ज्ञापकं॥ अन्यथा त्वंकारे चेति वदेत्॥ तद्धि उ
त्तरत्रोभयोः संबंधार्थं॥ उदाहरणानि स्फुटानि॥ दृष्टमनित्यं॥ अतएव तृतीया च होरित्यत्र चानुकृष्टाया अपि द्वि
तीयायाः अंतरांतरेणेत्यत्र संबंधः॥ जुटिचल्कप इति सूत्रस्थेनानुवृत्तस्य सकलस्य चकारप्रत्याख्यानेन द्विरूपं
॥ व्याख्यानादेवानुवृत्तिनिवृत्त्योर्निर्वाह इति तदाशयात्॥ कुलिजाल्लुक्खौ चेति सूत्रस्य भाष्यविरुद्धाच॥ नत्र ४२
हि द्विगोष्ठंश्चेति सूत्रात् ष्ठन्ष्ठनस्तन्त्रेणाप्यनुकृष्टस्य खोऽन्यतरस्यामिति सूत्रे चानुवृत्तिस्वीकृतस्य लुक्खौ चेति

भाष्ये प्रत्याख्यातं॥ ७६॥ नन्वनुदात्तादेरंतोदात्ताच्च यदुक्तं तेन तद्व्यंजनादेर्व्यंजनांताच्च न प्राप्नोतीत्यत आह॥ स्वरवि
धौ व्यंजनमविद्यमानवत्॥ स्वरोद्देश्यके विधावित्यर्थः॥ नोत्तरपदेनुदात्तादावपृथिवीरुद्रपूषमंथिष्विति सूत्रे पृ
थिव्यादिपर्युदासोऽस्याज्ञापकः॥ अन्यथा पृथिव्यादीनामनुदात्तादित्वाभावात्प्राप्तौ तद्वैयर्थ्यं स्पष्टमेव॥ धर्मि
ग्राहकमानादेव च स्वरोद्देश्यकविधिविषयकमिदं॥ अतएव शतुरनुमो नद्यजादी अचः कर्तृयकीत्यादौ अजाद्य
च इत्यादीनां चारितार्थ्यं॥ अतएव राजवतीत्यादौ नलोपस्यासिद्धत्वादन्वतीशब्दत्वादंतोदात्ता इति स्वरो नोदृष्वि
त्वानि मन्त्रस्त्वनुअप्यामिति मतुबुदात्तत्वं चनेत्याकारः॥ स्पष्टं चेदं समासस्येति सूत्रे भाष्ये॥ उच्चैरुदात्त इति सू
त्रे कैयटस्तु इयमनावश्यकी समन्विवाहंतानुपरागे णहलोपि उदात्तादिवदवभासात्तदुपपत्तेरित्याह॥ तत्र भा
ष्येपि ध्वनितमेतत्॥ ७७॥ नन्वेमपि राजदृषदित्यादौ समासस्यांतोदात्तत्वे षकाराकारस्य न स्यात् अत आह॥ ह
ल्स्वरप्राप्तौ व्यंजनमविद्यमानवत्॥ अस्याश्रयतो नाव इति सूत्रे नोप्रतिषेधो ज्ञापकः॥ नाव्यमित्यत्रादिनकारो

नस्वरयोग्योयश्चाकारस्तद्याप्येनासावादिरितिप्रतिषेधोनर्थकः॥नचादिरेवनकारउदात्तगुणविशिष्टांत
रतमाजयोस्त्वितिवाच्यं॥तथासतिनिमित्तभूतद्यच्कत्वस्यविनाशादुपजीव्यविरोधेनाद्युदात्तताप्राप्तेरित्यन्यत्र
विस्तरः॥स्पष्टाचेयंसमासस्येतिसूत्रेभाष्ये॥७८॥ननुप्ररणगुणेतिनिषेधस्तवातिस्यात्‌दिवऔदितिसौत्तंदिवेः
क्विप्यपिस्यात्तथायत्तोनावइतिस्वरोण्यत्यपिस्यात्‌दशोङ्गुणइतिचङ्यपिस्यादतआह॥निरनुबंधकग्रहणे
नसानुबंधकस्य॥तदनुबंधकग्रहणेनातदनुबंधकस्यग्रहणं॥वामदेवाड्ड्यड्यावितिसूत्रेड्यड्ड्यौतौर्दित्वमनयो
र्ज्ञापकं॥तद्धिययतोश्चातदर्थेइसत्रानयोरग्रहणार्थं॥नञःपरस्ययदंतस्योत्तरपदस्यांतोदात्तमितितदर्थः॥
एवंचावामदेवेःअयपर्वपदप्रकृतिस्वरएवभवतितन्मात्रानुबंधकग्रहणेसचानश्चानुबंधोयस्यतद्ग्रहणंनेत
र्थः॥एतेचप्रत्ययाप्रत्ययग्रहणसाधारणोदिवऔदित्यादौभाष्येसंचारितत्वात्‌॥वर्णग्रहणेचानयोरप्रवृत्तिरि
तिस्पष्टंमोऽडआपइतिसूत्रभाष्ये॥येनानुबंधेनसाधुनुबंधकत्वंद्यनुबंधकत्वंवातदनुच्चारणेएवैषाधर्मिग्राह ५३

कमानात्‌॥तेनजश्शसोरितिसूत्रेनैषेतिनिरनुबंधकत्वात्तद्धितशसएवात्रग्रहणंस्यादितिनशंक्यं॥एवमंत्यस्यत
रानुबंधोच्चारणेरावं॥तेनवनोरचेत्यादौवनिष्ठक्निपोर्ग्रहणसिद्धिः॥एकानुबंधकग्रहणेसंभवतीतुअर्थोनभाष्या
दिसंमतइत्यन्यत्रविस्तरः॥७९॥नवैनुकुटीरइत्यादौस्वार्थिकत्वात्स्वार्थिकानांप्रकृतितोलिंगवचनानुवृत्तेर्नापि
प्राप्तत्वात्पुंस्त्वानुपपत्तिरधकल्पमित्यत्रनपुंसकत्वैकवचनयोरनुपपत्तिश्चस्यतआह॥केचित्स्वार्थिकाःप्रकृतितोलिं
गवचनान्यतिवर्तंते॥णचःस्त्रियामितिसूत्रेस्त्रियामित्युक्तिरस्याज्ञापिका॥अन्यथाकर्मव्यतिहारेणचास्त्रियामि
तिण्चःस्त्रियामेवविधानात्किंतेन॥स्पष्टंचेदंबहुज्विधायकेभाष्ये॥८०॥ननुसुपथीनगरीमत्रयुवोरनाकावि
तिसूत्रेभाष्यादाहृतेइनःस्त्रियामितिकस्मादतआह॥समासांतविधिरनित्यः॥प्रतेरंश्वादयस्तत्पुरुषेइत्यंतोदा
त्तत्वायांश्वादिषुराजन्शब्दपाठोस्याज्ञापकः॥अन्यथाटचैवांतोदात्तत्वेसिद्धेकिंतेन॥द्वित्रिभ्यांपादन्मूर्ध्स्वितिसू
त्रविधायकेभाष्येस्पष्टेयं॥८१॥ननुशतानीत्यादौनुमिकृतेषट्संज्ञाप्राप्नोतितत्तश्चलुक्स्यात्तथाउपादास्तेत्य

प.भा.शे. त्रात्वे कृते स्याद्यो ऽचि स्वे इति सूत्रे पोत्वं प्राप्नोतीत्यत आह ॥ सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥ सन्निपातो द्व
५५ योः संबंधस्तन्निमित्तो विधिस्तत्सन्निपातं यो विहंति तस्यानिमित्तमित्यर्थः ॥ उपजीव्यविरोधस्यायुक्तत्वमिति न्या
यमूलैषा ॥ अत एवात्र सन्निपातशब्देन न पूर्वपरयोः संबंध एव किंतु विशेष्यविशेषणसन्निपातोपि गृह्यते ॥
अत एव ग्रामणिकुलमित्यादौ नपुंसकह्रस्वत्वेपि तिकृतीति नुग्न ॥ आप्रातिपदिकाजंतत्वसन्निपातेन जातस्य
ह्रस्वस्य तदविघातकत्वात् ॥ किंत्वजंतत्वविघातः स्पष्ट एव ॥ नचार्थाश्रयत्वेन ह्रस्वस्य बहिरंगतयाऽसिद्धत्वं ॥
अपकृतबहिरंगत्वानाश्रयणस्योक्तत्वात् ॥ किंच षत्वतुकोरसिद्ध इत्येतद्बलात्कृतितुग्ग्रहणाच्च तुग्विधौ बहि
रंगपरिभाषाया अप्रवृत्तेः ॥ सर्वविधसन्निपातग्रहणादेव वर्णाश्रयः प्रत्ययो वर्णविचालस्यानिमित्तं स्यादिति ॥
एतत्परिभाषादोषानिरूपणावसरे वार्तिककृतोक्तं ॥ नहि प्रत्ययः पूर्वपरसन्निपातनिमित्तकः सन्निपातशब्देन गृ
ह्यते इति मत्वा न प्रत्ययः सन्निपातनिमित्तक इति शंकायां तदभ्युपेत्यैवांगसंज्ञा तद्धि निमित्तं स्यादित्येकदेशिनोक्त ५५

मिति न तेन भाष्यविरोधः ॥ किंचैवं शैवो गार्ग्यो वैनतेय इत्यादावप्यंगसंज्ञाया लोपनिमित्तत्वानापत्त्या वर्णाश्रय इत्यस्यैवैय
र्थ्यं ॥ ग्रामणिकुलं ग्रामणिपुत्र इत्यादौ उत्तरपदनिमित्तके ह्रस्वत्वे यथाकथंचिद्बहिरंगपरिभाषयापि वारणं संभवती
ति कृन्मेजंतः ह्रस्वस्य पितीति सूत्रे चैकदेशिनानया परिभाषयानुग्वारितो भाष्ये ॥ अत एव परिभाषाफलत्वेनैतदुक्तं
कृन्मेजंत इति सूत्रे वार्तिककृतेति केचित् ॥ सन्निपातलक्षणविधित्वमस्या लिंगं ॥ स्वप्रवृत्तेः प्राक् स्वनिमित्तभूतो यः स
न्निपातस्तद्विघातकस्य स्वव्यतिरिक्तशास्त्रस्य स्वयमनिमित्तमिति फलति ॥ नन्वेवं रामायेत्यादौ सुपि चेति दीर्घो नापत्ति
रदंतांगत्वे सन्निपातेन जातस्य तदविघातकत्वात् ॥ नच यञादित्वसापेक्षस्य दीर्घस्य बहिरंगतयाऽसिद्धत्वान्नात्र सन्नि
पातविघात इति वाच्यं ॥ अतोपि नासिद्धत्वेपि वस्तुतद्विघातस्य जायमानत्वेन तन्न प्रवृत्तेः ॥ किंचांतरंगे कर्तव्ये बहिरंगस्या
सिद्धत्वेपि तत्र कृते तस्यासिद्धत्वे मानाभावः ॥ किंचातिदेशिकसन्निपातविघाताभावमादाय तत्प्रवृत्तौ गौरीत्यादौ संबु
द्धिलोपेपि स्यान्निवृत्ते न ह्रस्वनिमित्तसन्निपातविघाताभावाभावेनैव तस्यातिव्याप्तिपरकृन्मेजंत इति सूत्रस्थभाष्यासंगति

प.भा.शे. ॥ सन्निपातस्याशास्त्रीयत्वान्नात्रस्थानिवत्त्वमिति चेन्नत्रासिद्धत्वमपि कथमिति विभावय॥ अशास्त्रीये असिद्धत्वा
५५ प्रवृत्तेरीदूदेदिति सूत्रे कैयटेन स्पष्टमुक्तत्वात्॥ एवं च पूर्वत्रासिद्धीयेपि कार्ये एतत्परिभाषायाः प्रवृत्तिर्भवत्येवेति चे
न्न॥ कष्टायेति निर्देशेन तस्या अनित्यत्वात्॥ ययोः सन्निपातस्य विघातकं शास्त्रं तयोः सन्निपातनिमित्तकविधा
नुपादानमपेक्षितमिति तु नाग्रहः॥ अत एव दाक्षिरित्यत्राकारांतप्रकृतौ सन्निपातेनि त्तांगसंज्ञानया परिभाष
या लोपनिमित्तं न स्यादित्याशंक्यानित्यत्वेन समाहितं कृन्मेजंत इति सूत्रे भाष्ये॥ न ह्यंगसंज्ञायामदंतस्यांगसंज्ञेत्युक्त
मस्ति॥ न च कुं न कारेष्वाधयेद्रसादावव्ययसंज्ञाया अनया परिभाषया वारणपरभाष्यासंगतिस्तत्र यापरिभा
हि षया लुङ्मा न्न त॥ अव्ययत्वं तु स्यादेव॥ लुकाहि तदीयसन्निपातस्य विघातो नाव्ययसंज्ञायाः संज्ञाफले त्वकच्च्यादि
तिवाच्यं॥ एतदुदाहरणपरभाष्यप्रामाण्येन साक्षात्परंपरया वा स्वनिमित्तसन्निपातविघातकस्य स्वयमनिमित्तमि
ति तदर्थे नादोषात्॥ एतेनात्राकच्च्यादिसिद्धये पारस्तं॥ न च कार्यकालपक्षे लुगेकवाक्यतापन्नसंज्ञाबाधेप्यकजेक
वाक्यतापन्ना स्यादिति वाच्यं॥ अंतरंगायां तदेकवाक्यतापन्नसंज्ञायां बहिरंगगुणादेरसिद्धत्वात्॥ लुगेकवाक्यताप
न्नानुनगुणादितो बहिरंगा उभयोरपि शब्दतः सुबाश्रयत्वात्॥ नयासयोरिति निर्देशाच्चैषा ऽनित्या॥ तेन नातिप्रसंगः॥
स्पष्टा चेयं कृन्मेजंत इति सूत्रे भाष्ये॥ अस्या अनित्यत्वे फलानि भाष्ये परिगणितानि॥ वर्णाश्रयः प्रत्ययो वर्णविकाल
स्यानिमित्तं॥ दाक्षिः १ आत्वं पुग्विधेः क्नापयति २ युग्घ्रस्वत्वस्य। अदीदपत् ३ सदाघकारच्छान्विधेर्यासेति। ४। ३ उविधि
ः आकारलोपस्य पपिवान् ५ ह्रस्वनुड्न्यां मतुप्॥ अंतोदात्तादुत्तरपदादिति मनुपूर्विभक्तिउदात्तत्वं पूर्वनिघातस्य
॥ अग्निमान् परमवाचा ६ नदीकह्रस्वत्वं संबुद्धिलोपस्य॥ नदीकुमारी त्यादि॥ ७॥ यादेशः सुपिचेति दीर्घत्वस्य रामाय॥
८ इतोन्यत्र प्रवृत्तिरेव॥ दोषाः स्वल्पपि साकल्येन परिगणिता इति भाष्योक्तेरित्यलमत्र विस्तरः॥ ८२॥ ननु पंचेंद्राण्यो देव
ता अस्य पंचेंद्रः इत्यादौ द्विगोर्लुगिति अणो लुकि लुक् तद्धितलुगिति स्त्रीप्रत्ययलुक्यानुकः श्रवणानापत्तिरत आह॥ स
न्नियोगशिष्टानामन्यतरापाये उभयोरप्यपायः॥ ननु अवङ्स्फोटायनस्येति सूत्रे गवाग्रमिति प्रतीकमुपादाय सन्निपातपरिभाषाया अनित्यत्वा
२ दीर्घ इति बध्यमिति शब्देन्दुशेखरस्य समाधिः॥ अर्जुनेस्त्रीलिंगेमसामिति प्रतीकमुपादाय सन्निपातपरिभाषाया अनित्यत्वा घणितितत्र त्यसमाधिश्च भाष्यविरुद्ध इति ३
३ चेन्न॥ शाखोपीति सूत्रे स्यागवाक्षः संशितव्रत इति भाष्यप्रयोगान्नधामनुविति सूत्रनिर्देशाच्चानित्यत्वेन तदप्रवृत्तिरिसाशयात्॥ ३

अत्र च बिल्वकादिभ्यश्छस्य लुगिति सूत्रस्थं छग्रहणं ज्ञापकं ॥ तद्धि छमात्रस्य लुग्बोधनद्वारा कुकोऽनिवृत्तिर्यथा
स्यादित्येतदर्थं ॥ कृतकुगागमनड्घंतर्गणा बिल्वकादय एव निर्दिष्टा बिल्वकादिशब्देन ॥ नचैवमपि छग्रहणं व्य
र्थं कृतकुगागमानुवादसामर्थ्यादेव तदनिवृत्तिसिद्धेः ॥ अन्यथा बिल्वादिभ्य इत्येव वदेत् ॥ लक्षणप्रतिपदोक्त
परिभाषया बिल्वादिपुरस्कारेण विहितप्रत्ययस्यैव लुग्विधानान्नातिप्रसंग इति वाच्यं ॥ ततोपि प्रतिपदोक्तत्वे
न बिल्वादिभ्योणिति विकारार्थस्य लुगापत्तिवारणार्थं कुगनुवादेन चारितार्थ्यात् ॥ समुच्चयार्थकचशब्दयोगे तु
विधेययोरेककालिकत्वैकदेशत्वनियमान्नायं सिद्धापीयं ॥ यत्तु णाविष्टवदित्यनेन पुंवत्वविधानमेतदनित्य
त्वज्ञापनार्थं ॥ अन्यथा एतयतीत्यादौ टिलोपेनैव ङीपो निवृत्तेः सालियोगशिष्टपरिभाषया नस्यापि निवृत्तेः एतय ५६
तीत्यादिसिद्धौ पुंवत्त्ववैयर्थ्यं स्पष्टमेवेति टेरिति सूत्रे कैयटस्तन्न ॥ इडविडमाचष्टे ऐडविडयतीत्यादौ पुंवत्वस्या

१ इडविड अस्माज्जनपदे स्मज्ञो अविडः ॥ तस्य स्त्रियामतश्चेति लुक् ॥ इडविड् असमा ॥ णिचि पुंवत्वे सति रूपातिदेशाद अंतस्यागमने ऐडविड इति स्थिते अत्र लोपे च रस्या
१ निवृत्तावाद्वृद्धिश्रवणं भवत्येव ॥ आदिनादारयतीति ॥ ५१

वश्यकत्वात् ॥ एतेनेयः श्यैनेय इत्यादि तु स्यान्निवत्त्वेनेष्टसिद्धमित्यन्यत्र विस्तरः ॥ ८३ ॥ ननु चुराशीलमस्याः चौरी इत्यादौ
शीलछत्रादिभ्योण इति णो ङीप्प्रसंगो नातीत्यत आह ॥ ताच्छीलिके णेपि कृतानि भवंति ॥ अनित्यण्यपि विहितप्रकृतिभा
वबाधनार्थं कार्मस्ताच्छील्य इति निपातनमस्याः ज्ञापकं ॥ ताच्छीलिके णं तादृशोग्रहण इति किंचिद्धिरस्याः प्रयोजनमि
ति नव्याः ॥ ताच्छीलिके इत्युक्तेस्तदन्यस्यां ग्रहणमिति णोदंडेत्येव ॥ कार्म इति सूत्रे भाष्ये स्पष्टैका ॥ ८४ ॥ ननु कंसपरि
मृड्भ्यामित्यादौ मृजेर्वृद्धिर्दुर्वारेत्यत आह ॥ धातोः कार्यमुच्यमानं तत्प्रत्यये भवति ॥ म्रोणहन्त्येत्यत्र तत्वनिपातनं
चास्याज्ञापकं ॥ धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानमिति पाठस्तु प्रसिद्धिरित्यादौ अनुदात्तस्य चर्दुपधस्ये
त्यमागमापादानेन भाष्ये दूषितः ॥ यत्कार्यं प्रत्ययनिमित्तकं तत्रैवेयं व्यवस्थापिका ॥ तेन पदांतत्वनिबंधनं नशेर्वे
तिकुत्वं प्रणड्भ्यामित्यादौ भवत्येव ॥ इयङादिविधौ तु नैषा ॥ न भूसुधियोरिति निषेधेनानित्यत्वात् ॥ मृजेर्वृ
द्धिरित्यत्र भाष्ये स्पष्टा ॥ ८५ ॥ ननु सर्वकैरुच्चैर्कैरित्यादौ सर्वनामाव्ययसंज्ञेन स्यातामत आह ॥ यत्र ध्रपतित्त

प.भा.प्र. स्तनुग्रहणेनगृह्यते॥नेदमदसोरकोरितिप्रतिषेधोस्याज्ञापकः॥तदेकदेशभूतंतद्ग्रहणेनगृह्यतइतियेनविधि
८१ रितिसूत्रेभाष्येपाठः॥८६॥ननुगातिस्थाघुपाभूभ्यइतिसिचोलुक् अपासीदित्यादौपातेरपिस्यादतआह॥
लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैवग्रहणं॥अस्याश्चज्ञापकंस्वरतिसूतीतिसूत्रेसूङ्इतिकृतेपिसू
तिसूयत्योःपृथङ्निर्देशइतिकैयटः॥तत्रसाहचर्यादलुग्विकरणस्यैवप्राप्तेःपृथङ्निर्देशइत्येतज्ज्ञापकंचिंत्यं॥
ध्वनिताचेयंपरिभाषायस्यविभाषेत्यत्रभाष्ये॥तत्रहिविदितइतिप्रयोगेनिषेधमाशंक्ययदुपाधेर्विभाषात
दुपाधेर्निषेधः॥विभाषागमहनविदविशामितिसूत्रेशब्विकरणस्यग्रहणंलुग्विकरणस्यायमित्युक्तं॥तत्रत्वोहहेहै
यतोऽयंलुग्विकरणोऽतोविशिसाहचर्याच्छब्विकरणस्यैवग्रहणंनतुहनिसाहचर्यादस्याप्यनेनपरिभाषाविरो
धादितितदाशयः॥अतएवपरिभाषायांलुग्विकरणस्यैवेतिनोक्तं॥कंठतस्तुभाष्येएवाक्षात्पिनपठिता॥गा
तिस्थेतिसूत्रेपिबतेर्ग्रहणंकर्तव्यमितिवार्तिकव्याख्यावसरेतासर्वत्रेवपाग्रहणेऽलुग्विकरणस्यग्रहणंभाष्यउक्तत्वाच्चो ८१

क्तं॥स्वरतीतिसूत्रेकैयटेनचस्पष्टमुक्तं॥८१॥ननुघ्राजिघ्रापयिषतीत्यादौहेरचङीतिविधीयमानंकुत्वंनस्या
ति दतआह॥प्रकृतिग्रहणेण्यधिकस्यापिग्रहणं॥अचङीतिनिषेधएवास्याज्ञापकः॥इयंचकुत्वविषयैव॥हेरच
ङीतिसूत्रेभाष्येस्पष्टेयं॥८२॥ननुपुष्णीभ्यामित्यादौभ्यसइत्यत्रभ्यामितिच्छेदेभ्यसोभ्यमितिकृतेऽल्लोपेएत्वंस्या
दतआह॥अंगवृत्तेपुनरंगवृत्तावविधिः॥अंगेअंगाधिकारेवृत्तंनिष्पन्नंयत्कार्यंतस्मिन्सतिपुनरन्यस्यांग
कार्यस्यवृत्तौप्रवृत्तावविधानंभवतीत्यर्थः॥एषाचज्यादादीयसइत्याद्विधानेनज्ञापिता॥अन्यथाईकारलोपे
नाकृत्सार्वधातुकयोरितिदीर्घेणचसिद्धेतद्वैयर्थ्यंस्पष्टमेव॥अतएवेयमनित्यानिकंगकार्यविषयाप्येषा॥इयंचानि
त्या॥ह्रयोरितिनिर्देशात्॥अनित्यत्वबलेनभ्यार्थमादायेवभ्यसोभ्यमितिसूत्रेभाष्येपरिनिष्ठितस्येतिप
ठितं॥केचित्त्वनयापरिभाषयानकिंचिदपिसाध्यते॥अतएवज्ञाजनोर्जाज्यादादीयसइतिसूत्रयोरेनां
ज्ञापयित्वाकिंप्रयोजनमितिप्रश्नेपिबतेर्गुणप्रतिषेधउक्तःसनवक्तव्यइत्येवप्रयोजनमुक्तंनतुलक्ष्यसि
नन्वेवमपिज्ञाजनोर्जाइतिजादेशविधावंगसंबंधित्वरूपसमानस्थानिकत्वेएवैतत्प्रवृत्त्याप्रकृतेभ्यमएत्वयोस्तदभावेनैत्ववारणादतआह
८४

वाच्येउ

प·भा·शे· द्विरूपं च॥ तदुक्तं॥ भ्यसो भ्यमित्यत्राभ्यमित्येव छेदः॥ शेषे लोप इत्यत्र त्यलोपत्वे वा॥ अतो गुण इति पररूपेणासिद्धं यु

५८ ष्मभ्यमित्यत्र निरूपितं॥ एवं च सूत्रद्वयस्थमेतज्ज्ञापनपरभाष्यं भ्यसो भ्यमिति सूत्रस्थं च भाष्यमेकदेशयु

क्तिरित्याहुः॥ ८८॥ यत्तु ओतोदिति वैकल्प्ये ओर्गुण इति गुणग्रहणात्संज्ञापूर्वकविधेरनित्यत्वं॥ इयं च विधे

यकोटौ संज्ञापूर्वकत्व एव॥ तेन स्वायंभुवमिति सिद्धं॥ तथा निलोडित्येव सिद्धे आनिग्रहणादागमशास्त्रम

नित्यं॥ तेन सागरं तर्तुकामस्येत्यसिद्धं॥ तथा तनादिपाठादेव सिद्धे तनादिकृञ्भ्य इति सूत्रे कृञ्ग्रहणाद्गु

णकार्यमनित्यं॥ तेन न विश्वसेदविश्वस्त इति सिद्धं॥ तथा चक्षिङो ङित्करणादनुदात्तेत्त्वलक्षणमात्मने

पदमनित्यं॥ तेन स्फायत्यालिर्मोकमित्यादि सिद्धं॥ तथा विनार्थे नञा समासेनानुदात्तं पदमनेकमित्येव सिद्धे व

र्जग्रहणान्नञ्घटितमनित्यं॥ तेन नेयङुवङित्यस्यानित्यत्वाद्धे सुभ्रु इति सिद्धमिति॥ तन्न॥ भाष्येऽदर्शनात् ५८

॥ भाष्यानुक्तज्ञापितार्थस्य साधुतानियामकत्वे मानाभावात्॥ भाष्याविचारितप्रयोजनानां सौत्राक्षराणां

पारायण्यादावदृष्टमात्रार्थकत्वकल्पनाया एवौचित्यात्॥ किंच ज्ञापितेऽपि आनि इत्यस्य न सार्थक्यं॥ आडाग

मस्यैव प्रयोगाप्रसिद्धेः॥ आङ्ग्रहणं तु लोड्ग्रहणवदिति बोध्यं॥ अत एव घोर्लोपो लेटि वेति प्रत्याख्यातं॥ लो

पेऽपि आट्पक्षे आटः श्रवणं भविष्यति॥ दधादिति अदिदधदिति॥ आगमशास्त्रस्यानित्यत्वे तदुसत्ते दधो दि

त्यसिद्ध्या वाग्रहणस्यावश्यकत्वेन तत्प्रत्याख्यानासंगतिः स्पष्टैव॥ एतेन यत्कैयटे केचिदित्यादिनाऽस्यैव वा

ग्रहणस्य तदनित्यत्वज्ञापकतोक्ता सापि चिंत्या॥ प्रत्याख्यानपरभाष्यविरोधात्॥ चक्षिङो ङकारस्यानेदित्वा

भावसंपादनेन चारितार्थ्याच्च॥ तनादिसूत्रे कृञ्ग्रहणस्य भाष्ये प्रत्याख्यानाच्च॥ एवमेवातिदेशिकमनित्यं स

र्वविधिभ्यो लोपविधिर्बलवानित्यादि भाष्यानुक्तं बोध्यं॥ स्वायंभुवमित्यादिर्लोकेऽसाध्वेवेत्य

त्र विस्तरः॥ यद्यपि न तुह्नेर्यङ्लुक्याशीर्लिङि वधादेशो न स्यादत आह॥ प्रकृतिग्रहणे यङ्लुगंतस्यापि

ग्रहणं॥ वाष्टद्वित्वस्य द्विःप्रयोगत्वसिद्धं तेन प्रयोगद्वयरूपे समुदाये प्रकृतिरूपत्वबोधनेनेदं न्यायसिद्धं॥

प॰भा॰शे॰ अतएवढुंढुधीत्यादौद्वित्वेकृतेधित्वसिद्धिरिति॥ तदपिन॥ भाष्येऽदर्शनात्॥ किंचतेनसिद्धंतेनप्रसक्तं द्वयोस्तत्त्वबो
४९ धनेपिसमुदायस्यतत्त्वबोधनेमानाभावः॥ अतएववृद्ध्यतेद्विर्गीतिसूत्रे अस्तेःपरत्वाद्वित्वेकृतेपरस्यास्तेर्भूभावेकृते
पूर्वस्यश्रवणंप्राप्नोतीत्याशंक्याविषयसप्तम्याश्रयणेनपरिहृतंभाष्ये॥ अन्यथात्वदुक्तरीत्येकाजद्विर्वचनन्यायेनस
मुदायस्यैवादेशापत्तौतदसंगतिःस्पष्टैव॥ तस्मादुत्तरखंडमात्रस्यैवयथायोगंतत्तत्कार्यप्रवृत्तिर्बोध्या॥ मृजुर्वोरित्य
स्यानंतरंतस्यांगस्येत्यर्थात्साक्षात्सगुणस्यैवाभावोभवत्वितिनियमइतिनतद्विरोधः॥ तस्मादेतेर्यङ्लुकिवधादेस्यादिमाधवा
द्युदाहृतंचिंत्यमेवेत्यन्यत्रविस्तरः ४९॥ यद्यपिनतुवृद्धिर्यस्याचामादिरित्यत्रैकःपरिभाषोपस्थितौशारभीयाद्यसिद्धि
रतआह॥ विधौपरिभाषोपतिष्ठतेनानुवादे॥ अनुद्यमानविशेषणेषुतन्नियामकपरिभाषानोपतिष्ठतइतित
दर्थः॥ विध्यंगभूतानांपरिभाषाणांविधेयेनासिद्धतयासंबंधासंभवेपितद्विशेषणव्यवस्थापकत्वेनचरिता
र्थानांतद्विशेषणविशेषणव्यवस्थापकत्वेमानाभावइतितर्कमूलेयं॥ किंचोदीचामातःस्थानइतिसूत्रेस्थानेग्र ४९

हणमस्यालिंगं॥ अन्यथाषष्ठीस्थानेइतिपरिभाषयैवतल्लाभेतद्वैयर्थ्यंस्पष्टमेवेति॥ तन्न॥ उदात्तःस्वरितयोर्य
णःस्वादौष्यङःसंप्रसारणमितिसूत्रभाष्योक्तरीत्याअध्यापोनइत्यादौचतस्याव्यभिचारितत्वात्॥ भाष्यानुक्तत्वाच्च
॥ स्थानसंबंधोनपरिभाषालभ्यइत्यर्थस्यषष्ठीस्थानेइतिसूत्रभाष्येस्पष्टमुक्तत्वेनत्वदुक्तज्ञापकासंभवाच्च॥ त
त्रस्थानग्रहणंतुस्पष्टार्थमेव॥ किंचविधौपरिभाषेतिप्रवादइकोगुणवृद्धीअचश्चेत्यानयोर्विधीयतइत्यध्याहारमू
लकोन्यत्रतुनास्याःफलमित्यन्यत्रविस्तरः॥ ५०॥ ननुनमस्करोतिदेवान्नमःस्यात्देवानित्यादौनमःस्वस्तीतिच
तुर्थ्यादुर्वारेत्यतआह॥ उपपदविभक्तेःकारकविभक्तिर्बलीयसी॥ कारकविभक्तित्वंचक्रियाजनकार्थकविभ
क्तिकत्वंतच्चप्रथमायाअप्यस्तीतिसापिकारकविभक्तिरितिसहयुक्तेइत्यादिसूत्रेषुभाष्यध्वनितं॥ इयंचवा
चनिक्येव॥ अतएवयस्यचभावेनेतिसप्तम्यपेक्षयाऽधिकरणसप्तम्याबलवत्त्वमनेनन्यायेनतत्रचदीयतइति
सूत्रेभाष्यध्वनितंकैयटेनस्पष्टमुक्तं॥ एतेनक्रियान्वयित्वंकारकत्वमित्यपास्तं॥ यस्यचभावेनेतिसप्तम्याअपि

प॰भा॰शे॰ क्रियान्वयित्वात्॥ येतुप्रधानीभूतक्रियानिमित्तकार्यत्वेन कारकविभक्तीनां बलवत्त्वं वदंति॥ तेषामुभयोरपि
५० क्रियानिमित्तकत्वेन तदसंगतिः स्पष्टैव॥ नमोवरिवश्चितिसूत्रेण नमस्यतिदेवानित्यादौ चतुर्थीवारणाय भाष्येउ
पन्यासस्यासंगतेश्च॥ एतेन क्रियाकारकसंबंधोंतरंग इति तन्निमित्ता विभक्तिरंतरंगा॥ उपपदार्थेन तु यत्किं
चित्क्रियाकारकभावमूलकः संबंध इति तन्निमित्ता बहिरंगेत्यपास्तं॥ नमः स्वतीत्यत्र नमः पदार्थेपि क्रियाका
रकभावेनैवान्वयात्॥ अत्र नमः पदार्थस्यापि क्रियात्वं मुंडयतो मुंडस्येव सहयुक्ते इत्यादौ च प्रधाने प्रथमासाध
नार्थमिति भाष्येउपन्यस्तत्वस्य तत्रैव विस्तरः ९१॥ नन्वदमुयङि मादेशः सर्वस्यापि मुत्वापत्तिरत आह॥ अनंत्यविका
रेंत्यसदेशस्य॥ अंत्यसदेशानंत्यसदेशयोरेकप्रयोगे युगपत्प्राप्तौ अंत्यसदेशस्यैवेति तदर्थः॥ अन्यथा धात्वादेर्नत्वसत्वे
नेतासीतेत्यादावेव स्यात्॥ नतु नमति सिंचतीत्यादौ॥ अनंत्यविकार इति च लिंगं॥ अनेन समानोदेशो यस्य सोंत्य ५०
सदेशः॥ तत्वं चास्य वर्णत द्वर्णयोरितरेतरासमवधानेन बोध्यं॥ [illegible] इतरेत्यस्य विधिविधेयकार्यस्थानित्वानाक्रांतवर्ण इत्यर्थ इति के १
चित्॥ वस्तुतः अत्वाश्रयोयस्तत्वं इतरत्वं च अत्वाश्रयश्च साक्षात्परंपरया वा॥ साक्षाद्धि इस्तत्र॥ परंपरया च लीकृ प्यत इत्यत्र॥ एवं च न काप्यनुपपत्तिरिति दिक्॥ ५१

अत एव वविद्रूइत्याद्यर्थं न संप्रसारणो इति चरितार्थं॥ अह्नो पोन इत्यादेरनस्त द्धितो त्यादावाद्याकारादाव प्रवृत्तिरप्यस्याः फलं यजादि
त्वादिपरत्वं तोगस्याकारस्य लोप इत्यर्थे स्यैवां गांशे प्रत्ययस्यापि ताकांक्षत्वयोश्चिन्मात्॥ अंगावयव यजादिपरत्यानि इत्यादौ क
मेयानेकाक्षि ष्टक त्यनापेक्षया ऽस्याउवित्तत्वात्॥ नचैवा ष्यङः संप्रसारणमिति सूत्रे भाष्ये प्रसारण्याते ति त्वमितवो॥ वार्ति
कोक्तफलानां अनेकक्षि ष्टकः॥ अनाभिरन्यथासिद्धिं प्रदर्श्यायान्येतस्याः परिभाषायाः प्रयोजनानीतदर्थमेषा कर्त्तव्याप्र
तिविधेयं दोषेषु प्रतिविधानं चोरान्तनिर्देशात्सिद्धमिति सुपसंहारात्॥ निमार्जिषतीत्यर्थे च सा॥ तत्र वृद्धेः पूर्वमंतरंगत्वाद्धि
त्वे परत्वादभ्यासकार्येण तो ऽभ्यासेकारस्य वृद्धिवारणाय सा वश्यकी॥ नच वृद्धेः पुनरभ्यासरूपेण सिद्धिः॥ लक्ष्ये लक्षण
स्येति न्यायेन पुनरप्रवृत्तेः॥ यत्तु न संप्रसारण इति सूत्रे भाष्येनैतस्याः परिभाषायाः प्रयोजनानीत्युक्तं॥ तस्यायमर्थः॥ ए
तत्सूत्रे प्रयोजनान्येतस्याः परिभाषायाः प्रयोजनानि न भवंतीत्यर्थः॥ बधादावंत्यसमानदेशस्य णाभावात्॥ नेतान्ये
तस्याः प्रयोजनानीति पाठोपि क्वचिद्दृश्यते॥ वाचनिकेप्येवैषाम प्यशाच ष्यङः इति सूत्रे ऽद्रूसोसेरिति सूत्रे च केचिदसस
४ वृद्धेः प्रतिपदोक्तत्वेन शरणोनुदंत्विसं ५१

प.भा.शे.० देशस्येत्यनेन भाष्ये इत्यन्यत्र विस्तरः॥९२॥ नन्वक्तानुकरणस्यात इति पररूपं पटत्इति पटिति इत्यादौ अलोन्त्यस्येत्यनेनं
५१ त्यस्य प्राप्नोतीत्यत आह॥ नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे॥ अनभ्यासेत्युक्तेर्बिभर्त्तीत्यादौ भ्रजामिदित्यादौ त
सेव॥ अभ्यासोऽनर्थकोऽर्थाहृसभावात्॥ किंतु उत्तरखंड एवार्थवानित्यन्यत्र निरूपितं एषाऽलोन्त्यसूत्रे भाष्ये
स्पष्टा॥ फलानामन्यथासिद्धिकरणेन प्रत्याख्याता चेति तत्त्व एवावधार्यं॥९३॥ ननु ब्राह्मणवत्साच ब्राह्मणवत्स
श्चेत्यादौ पुमान्स्त्रिया इति एकशेषापत्तिः स्त्रीत्वपुंस्त्वातिरिक्तकृतविशेषाभावादत आह॥ प्रधानाप्रधानयोः प्र
धाने कार्यसंप्रत्ययः॥ तेन प्रधानस्त्रीत्वपुंस्त्वातिरिक्ताप्रधानस्त्रीत्वपुंस्त्वकृतविशेषस्यापि सत्वेन न दोषः॥ स्पष्टा
चेयं पुमान्स्त्रिया नपुंसकमनपुंसकेनेत्यादौ भाष्ये॥ अंतरंगोपजीव्यादपि प्रधानं प्रबलमिति हेतुमति चेति सूत्रे भा
ष्ये कैयटयोः॥९४॥ ननु स्वस्रादिभ्य इत्युक्तो मातृशब्दस्य ङीन्निषेधः परिच्छेत्तृवाचकमातृशब्दस्यापि स्यादत आह॥ अ
वयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी॥ तेन रूढस्य जननीवाचकस्यैव ग्रहणं॥ न परिच्छेत्तृवाचकस्य॥ यो ५१

गबोधेतरनाट्टिंगितं शुद्धरूढेर्जोपस्थितिः प्रतिबंधिकेति॥ क्तुसन्निरेव तद्वीजं रथकाराधिकरणन्यायसिद्धोयमर्थः॥
कश्चनु दीधीवेवीटामित्यत्रानया परिभाषया दीधीङ्-वेवीङोरेव ग्रहणं ननु देङ्-धेट्-वेङ्-वीनामिति तत्र तथा सति दी
वेधीवीटामित्येव वदेदित्यलं॥९५॥ ननु वातायनार्थे गवाक्षेऽवङो वैकल्पिकत्वाद्गोक्षरूपाद्यापि स्यादत आह॥ व्य
वस्थितविभाषयापि कार्याणि क्रियन्ते॥ लक्ष्यानुसाराद्व्यवस्था बोध्या॥ शाच्छोरिति सूत्रे छदः शत्रुशेत्यादिसूत्रेषु
च भाष्ये स्पष्टा॥ तत्र भाष्यसंमतैव व्यवस्थितविभाषा साधुत्वनियामिका॥९६॥ विधिनियमसंभवे विधिरेव ज्याया
न्॥ नियमे ह्यश्रुतायाः अन्यनिवृत्तेः सामर्थ्यात्परिकल्पनमुक्तानुवाददोषश्चेति लाघवाद्विधिरेवेति बोध्यं॥ यस्य
हलः इत्यत्र इजादेः सनुम इत्यत्र च भाष्ये स्पष्टेयं॥९७॥ ननु आशंसायां भूतवच्चेत्यनेन लुङ्वल्लङ्लिटोरपि अतिदे
शः स्यादत आह॥ सामान्यातिदेशे विशेषानतिदेशः॥ सामान्योपस्थितिकाले नियमेन विशेषोपस्थापकसामग्र्यभावो
ऽस्या बीजं॥ तेनानद्यतनभूते विशेषविहितयोस्तयोर्नातिदेशः॥ इयमानिस्यानस्यपीतिलिंगात्॥ तेन स्थानिवत्सू

प.भा.शे. त्रेणाविशेषातिदेशोपि॥ स्पष्टं चैतत् सर्वं स्थानिवत्सूत्रे भाष्ये॥ ९८॥ ननु सनाशंसभिक्ष उः इत्यातोपि स्यादत आह॥ प्रत्ययाप्रत्य
५२ ययोः प्रत्ययस्यैव ग्रहणं॥ इयं चांगसंज्ञासूत्रे भाष्ये पठिता॥ वर्णग्रहणे च न प्रवर्त्तत इति तत्रैव कैयटे स्पष्टं॥ अत एव
सनाशंसभिक्ष उः इत्यत्र सन इत्यस्य प्रत्ययस्यैव ग्रहणं॥ परे तु तित्स्वरितमिति सूत्र एषा लक्ष्यसंस्काराय भा
ष्ये क्वापि नाश्रितेति कैयटेनोक्तं॥ अंगस्येति सूत्रे तत्रत्यारव्यानापेक्षा परिभाषा भाष्य एकदेशिनोक्ता॥ अत एव ति
ति प्रत्ययग्रहणं कर्त्तव्यमिति वार्त्तिककृतोक्तं उक्तसूत्रयोः प्रत्यारव्यानान्न प्रत्ययस्यैव ग्रहणमित्याहुः॥ ९९॥ ननु विपरा
भ्यां जेरित्यात्मनेपदं परासेनाजयतीत्यर्थके पराजयति सेनेत्यत्र प्राप्नोतीत्यत आह॥ सहचरितासहचरितयोः सह
चरितस्यैव ग्रहणं॥ तेन विशब्दसाहचर्यादुपसर्गस्यैव ग्रहणं पराशब्दस्येति॥ तत्रैव भाष्ये स्पष्टं॥ सहचरणं सदृशयोरे
वेति सहचरितशब्देन सादृश्यं वानुच्यते॥ रामलक्ष्मणाविस्यादावपि सादृश्यमेव नियामकं॥ सदृशयोरेव सहवि
वक्षा तयोरेव सहप्रयोगः स्युत्सर्गाच्च॥ ध्वनितं चेदं कर्मप्रवचनीययुक्ते द्वितीयेति सूत्रे भाष्ये॥ ननु हि पंचम्यपाङ्प ५२

रिभिरिति सूत्रेण लक्षणादिद्योतकपरियोगे पंचमीमाशंक्य यद्यप्ययं परिर्दृष्टापचारो वर्जने चावर्जने चायं खल्वपशब्दो
दृष्टापचारो वर्जनार्थे एव कर्मप्रवचनीयस्तस्य कोन्यः सहायो भवितुमर्हति॥ अपो वर्जनार्थात्॥ यथाऽस्यागः सहाये
नार्थ इति गौरेवानीयते नाश्वो न गर्दभ इत्युक्तं॥ तेन हि सदृशानामेव प्रयोगे सहायभावो बोधितः॥ द्विस्त्रिश्चतुरिति सू
त्रे साहचर्येणैव कृत्वोर्थानां ग्रहणे सिद्धे कृत्वोर्थग्रहणादेषानित्या॥ तेन दीधीवेवीटामित्यादौ साहचर्येणागमसे
टो ग्रहणमित्यन्यत्र विस्तरः॥ १००॥ नन्वस्थ्यादीनामनङ् प्रियसक्थ्ना ब्राह्मणेनेत्यत्र न स्यादंगस्य नपुंसकत्वाभावाद
त आह॥ श्रुतानुमितयोः श्रुतसंबंधो बलीयान्॥ श्रुतेनैव संबंधो नानुमितेन प्रकरणादिना प्राप्तेनेत्यर्थः॥ प्रक
रणादितः श्रुतेर्बलवत्त्वादिति भावः॥ एवं च तत्र लिंगं अस्थ्यादीनामेव विशेषणं नांगस्य॥ शिशी लुङ्लुग्विधिषु लु
ग्गृह्यमाणस्यैवाभावात् प्रकरणप्राप्तांगस्यैव विशेषणं॥ अत एव चान नपुंसकस्येति सूत्रे ब्राह्मणवित्ते न कृतं॥ न
पुंसकग्रहणं हि तत्र गृह्यमाणस्य शब्दस्यैव नपुंसकत्वे यथा स्यात्॥ बहवो दद्ध्नो येषु तानि कुलानि बहुदद्ध्नीम

त्रमात्त्वत्॥ बहूनि दद्रंतीति येषु ते बहुदद्रंतः इत्यत्र च यथा स्यादित्येवमर्थं॥ स्य इंश्चेदस्वमोर्नपुंसकादित्यत्र भाष्ये॥
केचित्तु अचोरहाभ्यां द्वे इत्यत्र श्रुतेन रेफस्य निमित्तत्वेन यरं तद्भावादनुमितं कार्यित्वं बाध्यते इत्येतदुदाहरणमा
हुः॥ तन्न॥ तत्र कौंडिन्यन्यायेनासिद्धेरित्यन्यत्र विस्तरः॥१०१॥ ननु तत्पुरुषे तुल्यार्थेति स्वरः परमेणकारकेण
परमकारकेणेत्यादौ स्यात्तथा गातिस्थेति लुकू पेशोषणे इत्यस्मान्नरस्यापि स्यादत आह॥ लक्षणप्रतिपदो
क्तयोः प्रतिपदोक्तस्यैव ग्रहणं॥ लक्षणं लाक्षणिकमुपचारात्॥ तेन रूढभक्ति विशेषाद्यनुवादेन विहितः समासा
दिः प्रतिपदोक्तः तस्यैव ग्रहणं॥ शीघ्रोपस्थितिकत्वात्॥ द्वितीयो हि विलंबोपस्थितिकः॥ पेइत्यस्य पाइति लक्ष
णानुसंधानपूर्वकं विलंबोपस्थितिकं पिबतेस्तु तच्छीघ्रोपस्थितिकं॥ इदमेव हि एतत्परिभाषाप्रवृत्तौ बीजं
॥ इयं च वर्णग्रहणेपि॥ ओत्सूत्रे भाष्यसंचारितत्वात्॥ यत्तु वर्णग्रहणे नैषा आदेच इत्सूत्रोपदेशग्रहणादिति
तत्तु तस्मिन्नेव सूत्रे शब्देंदुशेखरे दूषितमिति तत एव द्रष्टव्यं॥ आनेत्याचेयं तु वक्ष्यमहाव्याहृतेरिति महा ५३

व्याहृतिग्रहणादित्यत्र विस्तरः॥१०२॥ नन्वेवं देङो दोधातोश्च कृतात्वस्य घुसंज्ञा न स्यात्तथा मेङ आत्वे प्रणिमातेत्य
त्र वेर्गदेतिणत्वं न स्यात्तथा गै इत्यस्यात्वे घुमास्थेतीत्वं न स्यादत आह॥ गामादाग्रहणेष्वविशेषः॥ अत्र च ज्ञाप
कं दैपः पित्त्वं॥ तद्धि अदाबिति सामान्यग्रहणार्थं॥ अन्यथा लाक्षणिकत्वादेवविधौ तद्ग्रहणे सिद्धे किं निषेधे सा
मान्यग्रहणार्थेन पित्त्वेन॥ तेन चैकदेशानुमतिद्वारा संपूर्णा परिभाषा ज्ञाप्यते॥ इयं च लक्षणप्रतिपदोक्तपरिभा
षानिरनुबंधकपरिभाषालुग्विकरणपरिभाषाणां बाधिका॥ दाधाघ्विति सूत्रे भाष्ये स्पष्टा॥ गातिस्थेति
सूत्रे इणादेशगाग्रहणमेवेष्यते इति न दोषः इत्यन्यत्र विस्तरः॥१०३॥ ननु वृद्ध्यादिसंज्ञाः समुदाये स्युरत आह॥ प्रत्ये
कं वाक्यपरिसमाप्तिः॥ देवदत्तादयो भोज्यंतामिति अत्र भुजिवत्॥१०४॥ नन्वेवं संयोगसंज्ञा अभ्यस्तसंज्ञा अ
पि प्रत्येकं स्यादत आह॥ क्वचित्समुदायेपि॥ गर्गाः शतं दंड्यंतामर्थिनश्च राजानो हिरण्येन भवंतीत्यादौ दंडनव
त्॥ लक्ष्यानुरोधाच्च व्यवस्था॥१०५॥ ननु पूत्स्यास्यावित्यत्र व्याप्तिपक्षे दीर्घनिर्देशादनपुंसकस्यारूक सत्राप्राप्तौ

दात्ताद्यन्यतमोच्चारणेऽन्यस्वरकस्य संज्ञा न स्यादत आह॥ अभेदका गुणाः॥ असति यत्ने स्वरूपेणोच्चारितो गुणो न भेद-
को न विवक्षित इत्यर्थः॥ अत्र चास्थिदधीत्यादिषु अनङादेरुदात्तस्यैवोच्चारणे नासिद्धोदात्तत्वग्रहणं ज्ञापकं॥ स्वरूपे
णोच्चारित इत्युक्तेरनुदात्तादेरतो दात्तादिष्वपि तादृशोच्चारणे विवक्षैव॥ उञः ऊँ इत्यत्रानुनासिकत्वेनोच्चारणीये
यत्नाधिक्ये नानुनासिकोच्चारणे न विवक्षाबाधा॥ पथिमथ्यृभुक्षामात् इत्यादौ स्थान्यनुरूपतयाऽनुनासिकत्वेनोच्चा-
रणीये निरनुनासिकोच्चारणात्तद्विवक्षा॥ एतदर्थमेवासति यत्न इत्युक्तं॥ नचैवमस्थ्यादीनां तद्विषयस्येमा-
द्युदात्तत्वं अनङादेशस्यानङः स्थान्यनुरूपेऽनुदात्तत्वेनोच्चारणीये उदात्तोच्चारणं विवक्षार्थं भविष्यतीति कथम
स्य ज्ञापकत्वमिति वाच्यं॥ परमास्थिशब्दादौ अन्तोदात्ते उदात्तगुणकस्यापि स्थानित्वे न विवक्षायां मानाभावात्॥ तत
स्याद्युदात्तनिपातनं करिष्यते॥ वधादेशो आद्युदात्तनिपातनं करिष्यते॥ पदादयोऽन्तोदात्ता निपात्यन्ते॥ सहस
मउदात्तो निपात्यते इत्यादि भाष्यं तु एकश्रुत्याऽष्टाध्यायीपाठे क्वचिदुदात्ताद्युच्चारणं विवक्षार्थमित्याशयेनाऽत्रै- ५४

स्वर्येण पाठ इति पक्षे तु ज्ञापकपरं भाष्यमिति कैयटादयः॥ परे तु निपातनं नाम ऽस्यादेशे प्रयोगे प्राप्तेऽस्यादेशप्रयोगकर
णं॥ तद्रूपाद्युत्तात्तत्त्वोदात्तादि विवक्षा॥ तिसृ च तसृ इत्यत्रापि ढढचयुक्ते अन्तोदात्ते उच्चारणीये आद्युदात्तोच्चारणाम
न्त्रस्थान्यनुरूपे स्वरे उच्चारणीये तदुच्चारणं विवक्षार्थं॥ संपूर्णाऽष्टाध्यायी आचार्येणैकश्रुत्या पठितेत्यत्र नमा
नं क्वचित्स्वरस्यापि एकश्रुत्या पाठो यथा दांडिनायनादिसूत्रे ऐक्ष्वाकेति॥ यद्यप्यध्येतारोऽङ्गानि एकश्रुत्यैव पठन्ति ब्रा
ह्मणवत्॥ तथापि आख्यानतोऽनुनासिकत्वादिवदुदात्तनिपातनज्ञानमिति आहुः॥ विधेयाणि विषये त्वप्रत्यय इति नि
षेधान्न गुणाभेदकत्वेन सवर्णग्रहणं॥ अत एव घटवदित्यादौ मतोर्मस्य नानुनासिको वकारः॥ अत एव तद्धाना
सामिति निर्देशः॥ अन्यथा प्रत्यये भाषायामिति नित्यमनुनासिकः स्यात्॥ जातिपक्षे तु नास्योपयोग इति बोध्यं॥
ऋदुत्यादौ दीर्घमात्रवृत्तिजातिनिर्देशान्न क्षतिरित्यन्यत्र विस्तरः॥१०६॥ ननु सर्वनामानीत्यादौ पात्वाभावे निपातने
पि लोके सर्वनामत्वप्रयोगस्य साधुत्वं स्यादत आह॥ बाधकान्येव निपातनानि॥ न तत्कार्येणाप्राप्ते निपातनारम्भात्॥ पुरा

प॰भा॰शे॰ णप्रोक्तेष्विति निपातितपुराणशब्देन पुरातनशब्दस्य बाधः प्राप्नोति पृषोदरादित्वान्नेति बोध्यं॥ पुराणेति पृषोदरादिपु
५५ ठितत्वेनेत्यन्ये॥ इयं सर्वादिसूत्रे भाष्ये स्पष्टा॥ अबाधकान्यपि निपातनानीति भाष्यविरुद्धं॥१०७॥ ननूरवधातोर्द्वित्वेस्व
त एव ह्रस्वत्वात् पूर्वं मध्यास ह्रस्वत्वाप्राप्तेः हलादिः शेषे सवर्णदीर्घे ह्रस्वापत्तिरत आह॥ पर्जन्यवल्लक्षणप्रवृत्तिः॥
एवं च ह्रस्वस्यापि ह्रस्वविधौ तल्लक्षणस्येति न्यायेन न पुनर्ह्रस्वः॥ तदुक्तं इकोसलिति सूत्रे भाष्ये॥ कृतकारि
खल्वपि शास्त्रं पर्जन्यवदिति सिद्धेपि ह्रस्वादिकारीत्यर्थः॥ न च लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिरित्यत्र न मानं इति
वाच्यं॥ समो वा लोपमेके इति लोपे नैकसकारस्य द्वित्वे न द्विसकारस्य पुनर्द्वित्वेन च त्रिसकारस्य च सिद्धेः समः
सुटीति सूत्रस्यैव मानत्वात्॥ संप्रसारणाच्चेति सिद्धे वृद्धिरेचीत्यादौ भाष्ये स्पष्टमुक्तत्वाच्च॥ अत्र विकरणागमतोल
स्य भेदोनेति सिद्धे वृद्धिरिति भाष्यात्प्रतीयते इत्यन्यत्र विस्तरः॥१०८॥ ननु संदधातोः स्यत्स्यतीत्यादावात्मनेपदनि
मित्तत्वाभावनिमित्तत्वान्न हन्न इति निषेधस्य बहिरंगत्वेनांतरंगत्वाद्वृद्धिलक्षणस्य द्विकल्पस्यापत्तिरत आह॥ ५५

निषेधाश्च बलीयांसः॥ अंतरंगादुपजीव्यादपि बलीयांस इत्यर्थः॥ चतुर्भ्य इति स्पष्टार्थमेव॥ अत एव तत्प्रसारणा
नं भाष्योक्तं संगच्छते॥ अत एव सवर्णसंज्ञादेर्निषेधविषयत्वेन विकल्पः॥ अन्यथा मीमांसकरीत्या विधेरुपजीव्यत्वे
न प्राबल्यात्सर्वथा बाधानुपपत्त्या दुर्वारः स इति मंजूषायां विस्तरः॥ अत एव द्वंद्वे च विभाषा जसीति चरितार्थं॥
विधुत्कृदनाय प्रवृत्तिरस्या बीजं॥ नलुमताकमेर्विधि: त्वनयोर्भाष्ये स्पष्टैषा॥१०९॥ नन्वसंतस्वार्थिकानामर्थ
प्रत्यायकत्वरूपप्रत्ययत्वानुपपत्तिरत आह॥ अनिर्दिष्टार्थाः॥ प्रत्ययाः स्वार्थे॥ यस्यार्थः॥ प्रकृत्या प्रत्याय्यते सोपि
प्रत्यय इत्यस्याभ्यंगीकारात्तस्य प्रत्ययत्वमिति न दोषः॥ स्वार्थ इत्यस्य स्वीयप्रकृत्यर्थ इत्यर्थः॥ महासंज्ञाबलादर्थ
कांक्षाया मन्त्रानुपस्थितिरस्या बीजं॥ सुपि स्थ इत्यादिसूत्रेषु भाष्ये स्पष्टैषा॥११०॥ योगविभागादिष्टसिद्धिः॥ इष्ट
सिद्धेरेवनत्वनियमात् नं कार्यमित्यर्थः॥ तत्र स्वसमानविधिकद्वितीययोगे न विभक्तस्यानित्यत्वज्ञापनबीजं॥१११
पर्यायशब्दानां लाघवगौरवचर्चा नाद्रियते॥ तत्र तन्त्रामनरस्यां विभाषा वेतिसूत्रनिर्देशज्ञापितमिदं॥११२॥ ज्ञापक

प॰भा॰शे॰ सिद्धं न सर्वत्र॥ स्पष्टमेव पठितव्येऽनुमानाद्बोधनम सार्वत्रिकार्थमित्यर्थः॥ तेन परिभाषामादाय यानि इष्टं नापाद
५६ नीयमिति तात्पर्यं॥ भाष्येपि ध्वनितमेतत् यास्सूत्रादौ॥ ज्ञापकेति न्यायस्याप्युपलक्षणं॥ न्यायज्ञापकसिद्धाना
मपि केषांचित्कथनं अन्येषामनित्यत्वबोधनायेति भावः॥ यथा नत्स्यानापन्नेत्तद्धर्मेला भद्गति न्यायसिद्धस्या
निवृत्तत्त्वज्ञापकसिद्धं तत्रान्यलूविधाविति॥११३॥ ननु दोग्धा दोग्धा द्रोग्धा द्रोढा द्रोढे स्यादोघत्वादीनामसिद्धत्वात् स
र्वं द्वित्वे एकत्र घत्वमपरत्र ढत्वमिति न स्यात्प्राप्तिरत आह॥ पूर्वत्रासिद्धीयमद्वित्वे॥ द्वित्वभिन्ने पूर्वत्र कर्तव्ये पर
मसिद्धमित्यर्थः॥ पूर्वत्रासिद्धमित्यधिकारनवशात्स्वमस्या ज्ञापकं॥ यत्र च सिद्धत्वासिद्धत्वयोः फले विशेषः त
त्रैवायं॥ हलस्मादिति त्वादौ जश्त्वा स्वमनंतरं वा द्वित्वे रूपे विशेषाभावेन नास्याः प्रवृत्तिरित्यन्यत्र विस्तरः॥ स
र्वस्य द्वे इति सूत्रे भाष्ये स्पष्टयं॥११४॥ ननु गोवश्वेषु च स्वामी स्यादिव द्रुंघ्वानां च स्वामी स्यपि स्यात् स्वामीश्व ५६

४ हलते चीसस्योपलक्षणं॥ अन्यथा वाङ्कवागिति भाष्योदाहरणे द्वित्वे कृते पूर्वककारस्य जश्त्वे कर्तव्ये परककारस्यासिद्धत्वेसशं परत्वेन जश्त्वा ४
४ पत्तिरिति बोध्यं स्य एश्वायमर्थो षट्चतुर्भ्यश्चेति सूत्रे शेखरे च ४

रेति सूत्रेण षष्ठीसप्तम्योर्विधानादत आह॥ एकस्या आकृतेश्चरितप्रयोगो द्वितीयस्यास्तृतीयस्याश्च न भव
ति॥ यत्रान्याकृतिकरणे भिन्नार्थत्वसंभावना तद्विषयोयं न्याय इत्यन्यत्र विस्तरः॥ हश्चानुप्रयुज्यत इति सूत्रे भा
ष्ये स्पष्टं॥११५॥ ननु विआधेत्यादौ परत्वाद्हलादिः शेषे वस्य संप्रसारणं स्यादत आह॥ संप्रसारणं तदाश्रयं च का
र्यं बलवत्॥ तदाश्रयं संप्रसारणाश्रयमिति पूर्वरूपं॥ वस्तुतो लिट्यभ्यासस्येति सूत्रे उभयेषां संप्रसारणमेव यथा स्या
दित्यर्थकत्वेनेदं सिद्धमित्येषा अर्थेति लिट्यभ्यासस्येति सूत्रे भाष्ये स्पष्टं॥ फलांतरान्यथा सिद्धिरपि तत्रैव भा
ष्ये स्पष्टं॥ यौ च संश्च उ इति विषये सर्वमीति तत्रापि न दोष इत्यन्यत्र विस्तरः॥११६॥ यत्तु क्वचिद्विकृतिः प्रकृतिं
गृह्णाति॥ तेन निसमुपविभ्यो ह्वः इत्यत्र ह्वाग्रहणे न ह्वेञो ग्रहणसिद्धिः॥ तथा औपदेशिकप्रायोगिकयोरौपदेशिक
स्यैव ग्रहणं॥ तेन दरिद्रातोरित्यत्रौपदेशिकस्यैव धातोर्ग्रहणमिति॥ तत्र॥ तयोर्निर्मूलत्वात्॥ भाष्याव्यवहृतत्वा
च्च॥ न च विकृतिः प्रकृतिं गृह्णातीति यद्दिङुपेतेसूत्र अन्यथा ह्वाययोः कृतयोः पश्चात्संप्रसारणेपि अभ्यस्तवदित्यस्यासिद्धिरिति भावः॥१॥

प. भा. शे.
८७

स्य भाष्ये व्याख्यायास्तिरस्काराच्च ॥ निसमुपविभ्यो ह्व इत्यादौ ह्वेञो ऽनुकरणे सोत्र प्रयोगः ॥ आत्वविषय एवात्मनेपदं प्र
योगस्यानाम एवानुकरणस्य घुसंज्ञा सूत्रे भाष्ये स्पष्टमुक्तत्वादित्यन्ये ॥ अंत्यापि तत्र तत्रोपदेशग्रहणं कुर्वतो सूत्रकृ
तो वार्त्तिककृतश्चासंमता ॥ इह हि व्याकरणे सर्वेष्वेव सानुबंधकेषु रूपमाश्रीयते यत्रास्यैतद्रूपमिति रूपनिग्रहश्च श
ब्दस्य नांतरेण लौकिकं प्रयोगं तस्मिंश्च लौकिके प्रयोगे सानुबंधकानां प्रयोगो नास्तीति कृत्वा द्वितीयः प्रयोग उपा
स्यते उपदेशो नाम तेषु संज्ञास्तत्रस्य भाष्येणाप्रायोगिकासंभवे तद्ग्रहणमिति स्पष्टमेव भाष्यासंमता चेयं भाष्ये
सानुबंधकेष्वादिष्वदृष्टानि प्रायेणाद्रहेरिति सूत्रे दादिपदस्योपदेशिकदादित्वं चेति लक्षणा इति न दोष इत्यन्यत्र वि
स्तरः ॥ यद्यपि नन्वजघ्नोः बेभिदीतीत्यादौ तत्तद्गुणप्रयुक्ता विकरणा यङ्लुकि सुः तथा यङ्लुकि बेभिदितेत्यादावेक
च इति इण्निषेधः स्यादत आह ॥ श्तिपा शपानुबंधेनानिर्दिष्टं यद्गणेन च ॥ यत्रैकाज्ग्रहणं चैव पंचैतानि न यङ्लुकि
॥ अनुबंधनिर्देशो द्विधा ॥ स्वरूपेणादिः त्त इत्यादिणा देन च ॥ हंति याति वाति ॥ सनीवं ६ तेति सूत्रे भरेति ॥ दीङ्युडु ८७

चि ॥ अनुदात्तङितः तदिवादिभ्यः श्यन् ॥ एकाच उपदेशे इत्युदाहरणानि ॥ द्वित्वं सनाद्यंत इति भवादय इति धातुत्वं
च भवत्येव ॥ गुणो यङ्लुकोरित्यादिभिर्निषेधानिसत्त्वकल्पनात् ॥ तेन नषभावोप्यजघ्नोरित्यादौ भवति ॥ अ
त एव श्चीदित इति कैयटे यत्रैकाज्ग्रहणं किंचिदिति पाठः ॥ एकाच उपदेशेनुदात्तादिति सूत्रे एकाज्ग्रहणेनैकदेशानु
मतिद्वारा एषा परिभाषा ज्ञाप्यते ॥ अन्यथोपदेशे ऽनेकाचां उदात्तस्यैव सत्त्वेन तद्वैयर्थ्यं स्पष्टमेवेति ॥ तदपि न ॥ भाष्या
नुक्तत्वात् ॥ एकाज्ग्रहणस्य वधिव्यावृत्त्यर्थमावश्यकत्वाच्च ॥ न च वधिस्थान्युपदेशे एकाजेवेति वाच्यं ॥ साक्षादुपदे
शासंभवेनातिद्विषये स्थान्युपदेशग्रहणात् ॥ उपदेशावच्छेदेनैकाच्त्व इत्यर्थाच्च ॥ किं चोत्तरार्थमेकाज्ग्रहणं ॥ अत ए
व जागर्वित्वानीत्यादौ उपदेशे ऽगंतत्वमादाय श्युक इति इण्निषेधो न ॥ तत्रोपदेश इत्यनुवृत्तिश्चास्तीणोभित्यादेः इण्नि
षेधापेक्षाकरेस्पष्टं ॥ न च भाष्ये यङ्लोपे बेभिदितेत्यादौ विट्प्रवृत्त्यर्थमुपदेशेनुदात्तादेकाचः श्रूयमाणादंगादि
त्यर्थे सनीट् प्रतिषेधो वक्तव्यो विभिन्सतीति दोषोपन्यासवघङ्लुकि दोषानुपन्यासेन तत्रेड् इष्टः यङ्लोपेस्ता

प॰भा॰शे॰
५८

दिभाष्यंतूपक्रमोपसंहारवलेननयङ्लुग्विषयं॥ किंचतस्यतद्विषयत्वेयङ्लोपोस्यानित्वस्येवयङ्लुक्युपाया
प्रदर्शनेनतस्यनतापत्तिरितिवाच्यं॥ इडुविषयेयङ्लुकोऽनभिधानेनछंदसिसर्वविधीनांवैकल्पिकत्वेनचतत्रदो
षानुपन्यासेनादोषात्॥ अनर्थेकाज्ग्रहणांकिमर्थमितिप्रश्नस्योत्तरत्वेनार्गेत्र्यर्थमित्युचविधमर्थमित्युत्तरस्य
चभाष्येनिरालंबनापत्तेः॥ नचार्द्धधातुकाक्षिप्तधातोरेकाजितिविशेषणं॥ एवंचविभिन्नतीत्यादाउत्तरखंडस्यधातो
रेकाच्त्वमस्त्येवउत्तरखंडःस्तित्ववत्॥ एतेनद्वयतेरितिसूत्रेभाष्येस्पष्टं॥ एवंचप्रकृतेतभाष्यासंगतिरितिवाच्यं॥ आ
क्षेपेआक्षिप्तस्यान्वयेचमानाभावात्॥ अंगत्वंतुविशिष्टेएवेत्यकाचोद्वेरितिसूत्रेभाष्येस्पष्टं॥ निरूपितंचतत्रादि
शेषेशेदुशेखरे॥ धातुत्वंतूत्तरखंडेएव॥ एकाचोबशोमषइतिसूत्रेधातोरवयवस्येकाचइतिवैयधिकरण्येनान्व
येनार्थसिद्धिःप्रयोजनमुक्तंभाष्ये॥ ननुप्रसिद्धमजर्घाइति॥ अतर्घौबेभिदीत्यादौश्नमस्यतारपस्तुचर्करीतंचेत्यस्यारा
दौपाठेनयङ्लुगंतेगणांतरप्रयुक्तविकरणस्याप्राप्त्यातभवंति॥ छांदसत्वादेवकार्यांतराणामपिछंदसिदृष्टप्रयोगे ५८

षुअदृष्टानामभावोबोध्यः॥ भाषायांतुतादृशानामभावएव॥ स्तिपाशपारिनिर्देशास्तुभवतेरहस्यादिस्यत्तन्निर्दे
शवत्तार्थसाधकाइतिअमत्रविस्तरः॥ ननुजभोरचिरपेस्नेनेटूयलिटिइत्येवसूत्रमनांकिं द्विरधिग्रहणेनेत्यतआह॥ प
दगोरवाद्योगविभागोगरीयान्॥ इतिवारकयंभिन्नवाक्यार्थकत्वेनेनगोरवंस्पष्टमेव॥ परंतुभाष्यासंमतेयं॥ दा
ङ्सीतिसूत्रस्यभाष्यविरुद्धंच॥ तत्रचेनादेशेऽकारप्रत्याख्यानंयोगविभागेनैवकृतमितिबहवः॥ ११५ अर्ध
मात्रालाघवेनपुत्रोत्सवंमन्यंतेवैयाकरणाः॥ एओङ्ऐऔच्सूत्रयोर्ध्वनितेषाभाष्ये॥ तत्रानेकपदघटितसूत्रे
पदलाघवविचारएवनतुमात्रालाघवविचारइतिऊकालोच्अष्टक्तएकालिसादिसूत्रेषुभाष्येध्वनितं॥ तत्रसू
त्रेऽल्ग्रहणाहल्ग्रहणयोर्विशेषविचारेसंज्ञायांहल्ग्रहणंण्पक्षत्रियेतिसूत्रेणिओरितिवाच्यंइतितत्रत्रीणिपदा
निअल्ग्रहणेतदेकंस्यादिलोपेहल्ग्रहणंध्येतिसूत्रेऽणिओरितिनवाच्यंअष्टकस्येतिवाच्यंइतित्रीण्येवपदानी
तिनास्तिलाघवंकृतोविशेषइत्युक्तं॥ अचिश्नुइतिसूत्रेइणाइत्येववक्तव्येयोरितिसमघग्रहणान्नपूर्वेणोस्यग्रहणं॥

इतिसत्रेणांषष्टीसत्ये